सारस्वतं व्याकरणम् ॥

पूर्वार्धम् ।

पण्डित दयाराम शर्म्मणा

काश्याम् तिमिरनाशकयन्त्रालये
मुद्रितम्

सं० १८४६

मूल्य ।)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

. Mumukshu Bhawan Varanasi Collection. Digitized by eGa

अथ

सारस्वतं व्याकरणम्।

श्रीगणेशाय नमः॥

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये।
सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम्॥१॥
इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः।
प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम्॥२॥

तत्र तावत्संज्ञा संव्यवहाराय संगृह्यते॥

॥ अइउऋऌसमानाः ॥ १ ॥

अनेन प्रत्याहारग्रहणाय वर्णाः परिगण्यंते तेषां समानसंज्ञा च विधीयते। नैतेषु सूत्रेषु सन्धिरनुसन्धेयोऽविवक्षितत्वात्। विवक्षितस्तु सन्धिर्भवतीति नियमात्। लौकिकप्रयोगनिष्पत्तये समयमात्रत्वाच्च॥ १॥

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्रस्वदीर्घप्लुतभेदाः सवर्णाः ॥२॥

एतेषां ह्रस्वदीर्घप्लुतभेदाः परस्परं सवर्णा भवन्ति। लोकाच्छेषस्य सिद्धिरिति वक्ष्यति। ततो लोकत एव ह्रस्वादिसंज्ञा ज्ञातव्याः। एकमात्रो ह्रस्वः। द्विमात्रो दीर्घः। त्रिमात्रः प्लुतः। व्यञ्जनं चार्धमात्रकम्। एषां मध्येऽप्युदात्तादिभेदाः सन्ति। उच्चैरुपलभ्यमान उदात्तः। नीचैरनुदात्तः। समवृत्त्या स्वरितः॥ ए ऐ ओ औ सन्ध्यक्षराणि। एषां ह्रस्वा न सन्ति॥ २॥

उभये स्वराः॥ ३॥

अकारादयः पञ्च चत्वार एकारादय इत्युभये स्वरा उच्यन्ते॥ ३॥

अवर्जा नामिनः॥ ४॥

अवर्णवर्जाः स्वरा नामिन उच्यन्ते। अनुक्रान्तास्तावत्स्वराः। प्रत्याहारजिघृक्षयिषया व्यञ्जनान्यनुक्रामति। हयवरलञणनङमझढधघभजडदगबखफछठथचटतकपशषसेति॥ ४॥

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आद्यन्ताभ्याम ॥ ५ ॥

प्रत्याहारंजिघृत्तता आद्यन्ताभ्यामेते वर्णा ग्राह्याः । आदिर्वर्णोऽन्त्येन सह गृह्यमाणास्तन्नामाप्रत्याहारः । तथाहि । अकारो वकारेण सह गृह्यमाणोऽव्प्रत्याहारः । स च अइउऋऌएऐओऔहयवरलञणनङमझढधघभजडदगव इत्येतावत्संख्याकः संपद्यते । चटतकप इति चप् प्रत्याहारः । जडदगव इति जव् प्रत्याहारः । झढधघभ इति झभ् प्रत्याहारः । ञणनङम इति ञम् प्रत्याहारः । एवं यत्र यत्र येन येन प्रत्याहारेण कृत्यं स तत्र तत्र ग्राह्यः । संख्यानियमस्तु नास्ति५

हसा व्यञ्जनानि ॥ ६ ॥

हकारादयः मकारान्ता वर्णा हसा व्यञ्जनानि भवन्ति । स्वरहीनं व्यञ्जनम् । तेष्वकारः सुखमुखोच्चारणार्थत्वादित्संज्ञको भवति ॥ ६ ॥

कार्यायेत् ॥ ७ ॥

प्रत्ययाद्यतिरिक्तः कस्मैचित्कार्यायोच्चार्यमाणो वर्ण इत्संज्ञको भवति । यस्येत्संज्ञा तस्य लोपः ७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वर्णादर्शनं लोपः ॥ ८ ॥

वर्णविरोधो लोपश् । मित्त्रवदागमः । शत्रुवदादेशः ॥ ८ ॥

स्वरानन्तरिता हसाः संयोगः॥९॥

कुचुटुतुपु वर्गाः । उकारः पञ्चवर्णपरिग्रहणार्थः ९

अर् ओ नामिनो गुणः ॥१०॥

नामिस्थानिका अर् ए ओ एते गुणसंज्ञका भवन्ति ॥ १० ॥

आरै औ वृद्धिः ॥ ११ ॥

आ आर् ऐ औ एते वृद्धिसंज्ञका भवन्ति ॥११॥

अन्त्यस्वरादिष्टिः ॥ १२ ॥

अन्त्यो यः स्वरस्तदादिर्वर्णः स टिसंज्ञको भवति१२

अन्त्यात्पूर्व उपधा ॥ १३ ॥

अन्त्याद्वर्णमात्रात्पूर्वो यो वर्णः स उपधासंज्ञो भवति ॥ १३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

असंयोगादिपरो ह्रस्वो लघुः॥ १४॥

विसर्गानुस्वारसंयोगादिपरो दीर्घश्च गुरुः॥ १५॥

मुखनासिकावचनोऽनुनासिकः १६

मुखनासिकाभ्यामुच्चार्यमाणो वर्णोऽनुनासिकः। मुखेनैवोच्चार्यमाणो निरनुनासिकः। द्विविन्दुर्विसर्गः। शिरोविन्दुरनुस्वारः। अकुहविसर्जनीयानांकण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। ⌣क इति जिह्वामूलीयः। ⌣प इत्युपध्मानीयः। अं इत्यनुस्वारः। अः इति विसर्गः॥१४॥१५॥१६॥

इति संज्ञाप्रक्रिया॥ १॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अधुना स्वरसन्धिर्विधीयते ॥

इयं स्वरे ॥१॥

इवर्णो यत्वमापद्यते स्वरे परे॥ दधि आनय इति स्थिते । दध् य् आनय इति तावत् भवति ॥१॥

हसेर्हसः ॥ २ ॥

स्वरात्परो रेफहकारवर्जितो हसो हसे परे द्विर्भवति । इति धकारस्य द्वित्वम् । पुनर्द्वित्वे प्राप्ते । न द्विरुक्तस्य द्विरुक्तिः । द्वित्वविधानसामर्थ्यात् द्वावेव शिष्येते । अन्ये हसा लुप्यन्ते ॥२॥

झभे जबाः ॥ ३ ॥

झसानां झभे परे जबा भवन्ति । इति पूर्वधकारस्य दकारः । सवर्णत्वाद्वर्ग्यो वर्ग्येण सवर्ण इति वचनात् । यथासंख्यं वा वक्तव्यम् । स्वरहीनं परेण संयोज्यम् । दध्यानय इति सिद्धम् । गौरी अत्र । अर्ह इति विशेषणान्न रेफस्य द्वित्वं किं तु राद्यपोद्विः । स्वरपूर्वाद्रेफात्परो यपो द्विर्भवति । जलतुम्बिकान्यायेन रेफस्योर्ध्वगमनम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गौर्यंत्र । स्वर इत्यनुवर्तते । एवमन्यत्रापि । यत्र न सूत्राक्षरैः कार्यसिद्धिस्तत्रसर्वत्र सूत्रान्तरात्पदानुवृत्तिर्ज्ञातव्या । ग्रन्थभूयस्त्वभयान्नास्माभिर्लिख्यते ॥ ३ ॥

उ वम् ॥ ४ ॥

उवर्णो वत्वमापद्यते स्वरे परे। मधु अत्र मध्वत्र४

ऋ रम् ५

ऋवर्णो रत्वमापद्यते स्वरे परे । पितृ अर्थः पित्रर्थः ॥ ५ ॥

ऌ लम् ६

ऌवर्णो लत्वमापद्यते स्वरे परे । ऌ अनुबन्धः लनुबन्धः ॥ ६ ॥

ए अय् ७

एकारो अय् भवति स्वरे परे। ने अनं नयनम् ७

ओ अव् ८

ओकारो अव् भवति स्वरे परे । लो अनम् लवनम् । भो अति भवति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गवादेरवर्णागमोऽक्षादौ वक्तव्यः ॥ * ॥

गो अक्षः गवाक्षः । गो इन्द्रः गवेन्द्रः । गो आजिनं गवाजिनम् । प्र ऊढः प्रौढः । स्व ईरिणी स्वैरिणी । अक्ष ऊहिणी अक्षौहिणी सेना । क्वचित् स्वरवद्यकारः । यथाध्वपरिमाणे गव्यूतिः । अन्यत्र गवां मिश्रीभावे गोयूतिः ॥ ८ ॥

ऐ आय् ९

ऐकार आय् भवति स्वरे परे। नै अकः नायकः ९

औ आव् १०

औकार आव् भवति स्वरे परे। तौ इह ताविह १०

य्वोर्लोपश्च वा पदांते

पदान्ते स्थितानामयादीनां यकारवकारयोर्लोपश्च वा भवति स्वरे परे । तौ इह ताविह ता इह । ते आगताः तयागताः-त आगताः । पटो इह पटविह-पट इह । लोपश्चि पुनर्न सन्धिः । छन्दसि तु भवति हे सखे इति हे सखयिति-हे सखेति ॥ ११ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एदोतोऽतः ॥ १२ ॥

पदान्ते स्थितादेकारादोकाराच्च परस्याकारस्य लोपो भवति। ते अत्र तेऽत्र। पटो अत्र पटोऽत्र॥१२

सवर्णे दीर्घः सह ॥ १३ ॥

सवर्णस्य सवर्णे परे सह दीर्घो भवति। श्रद्धा अत्र श्रद्धात्र। दधि इह दधीह। भानु उदयं भानूदयम् ॥ १३ ॥

अदीर्घो दीर्घतां याति नास्ति दीर्घस्य दीर्घता।
पूर्वदीर्घस्वरं दृष्ट्वा परलोपो विधीयते ॥ १ ॥
सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्।
परेण पूर्वबाधो हि प्रायशो दृश्यतामिह ॥ २ ॥

अ इ ए ॥ १४ ॥

अवर्ण इवर्णे परे सह ए भवति। तव इदं तवेदम्। मम इदं ममेदम्॥

हलादेरीषादौ टेर्लोपो वक्तव्यः ॥ * ॥

हल ईषा हलीषा। लाङ्गल ईषा लाङ्गलीषा। मनस ईषा मनीषा ॥ १४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ओमि च ॥ १५ ॥

ओमि परे नित्यं टेर्लोपो भवति । अद्य ओम् अद्योम् ॥ १५ ॥

उ ओ ॥ १६ ॥

अवर्णे उवर्णे परे सह ओ भवति । गङ्गा उदकं गङ्गोदकम् ॥ १६ ॥

ऋ अर् ॥ १७ ॥

अवर्णं ऋवर्णे परे सह अर् भवति । तव ऋद्धिः तवर्द्धिः ॥ १७ ॥

क्वचिदार् ॥ १८ ॥

अवर्णं ऋवर्णे परे क्वचिदार् भवति । ऋण ऋणं ऋणार्णम् । शीत ऋतः शीतार्तः ॥ १८ ॥

लृ अल् ॥ १९ ॥

अवर्णं लृवर्णे परे सह अल् भवति । तव लृकारः तवल्कारः ॥

ऋलृवर्णयोर्मिथः सावर्ण्यं वा वक्तव्यम् ॥ * ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

होतृ ऌकारः होतॄकारः ॥ होतॢकारः ॥

रलयोः सावर्ण्यं वा वक्तव्यम् ॥ * ॥

परि अङ्कः पर्यङ्कः-पल्यङ्कः ॥ १९ ॥

ए ऐ ऐ ॥ २० ॥

अवर्ण एकारे ऐकारे च परे सह ऐकारो भवति। तव एषा तवैषा । तव ऐश्वर्यं तवैश्वर्यम् ॥२०॥

ओ औ औ ॥ २१ ॥

अवर्ण ओकारे औकारे च परे सह औकारो भवति । तव ओदनं तवौदनम् । तव औन्नत्यं तवौन्नत्यम् ॥ २१ ॥

ओष्ठोत्वोर्वा समासे ॥ २२ ॥

अवर्णस्य ओष्ठोत्वोः परयोर्वा सह ओत्वं भवति समासे सति । बिम्ब ओष्ठः बिम्बौष्ठः-बिम्बोष्ठः । स्थूल ओतुः स्थूलौतुः-स्थूलोतुः ॥ २२ ॥

॥ इति स्वरसन्धिः ॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ प्रकृतिभाव उच्यते ॥

नामि ॥ १ ॥

अदस अमीशब्दः सन्धिं न प्राप्नोति । अमी आदित्याः । अमी उष्ट्राः । अमी एडकाः ॥ १ ॥

ईवे द्वित्वे ॥ २ ॥

ई च ऊ च ए च य्वे। ईकारान्त ऊकारान्त एकारान्तश्च शब्दो द्वित्वे वर्तमानः सन्धिं न प्राप्नोति ॥

मणीवादिवर्जम् ॥ * ॥

अग्नी अत्र । पटू अत्र । माले आनय । मणीवादीति किम् । मणी इव मणीव। रोदसी इव रोदसीव । दम्पती इव दम्पतीव ॥ ३ ॥

औ निपातः ॥ ३ ॥

आकार ओकारो निपाते एकस्वरश्च सन्धिं न प्राप्नोति। आ एवं मन्यसे। नो अत्र स्थातव्यम्। उ उत्तिष्ठ । अ अपेहि । इ इन्द्रं पश्य ॥ ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्रैह्वयोऽपि प्लुतः ॥ ४ ॥

प्लुतश्च सन्धिं न प्राप्नोति। देवदत्त ३ एहि ॥४॥

दूराद्वाह्वाने टेः प्लुतः ॥ ५ ॥

दूराद्वाह्वाने गाने रोदने विचारे च टेः प्लुतो भवति ॥ ५ ॥

इति प्रकृतिभावः ॥ ३ ॥

अथ व्यञ्जनकार्यमुच्यते ॥

चपा अबे जबाः ॥ १ ॥

पदान्ते वर्तमानाश्चपा जबा भवन्त्यबे परे। षट् अत्र षडत्र। वाक् यथा वाग्यथा ॥ १ ॥

ञमे ञमा वा ॥ २ ॥

पदान्ते वर्तमानाश्चपा ञमे परे ञमा वा भवन्ति। वाक् मात्रं वाग्मात्रम्। षट् मम षड्मम षण्मम ॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चपाच्छुशः ॥ ३ ॥

चपादुत्तरस्य शकारस्य छो वा भवति अवे परे । वाक्शूरः वाकछूरः ॥ ३ ॥

ह्रो झभाः ॥ ४ ॥

चपादुत्तरस्य हकारस्य झभा वा भवन्ति । यद्वर्गकचपस्तद्वर्गश्चतुर्थो भवति । तत् हविः तद्धविः । वाक् हरिः वाग्हरिः । वाग्घरिः ॥४॥

स्तोः श्चुभिश्चुः ॥ ५ ॥

स्तोः सकारस्य तवर्गस्य च शकारेण चवर्गेण च योगे शकारचवर्गौ यथासंख्येन भवतः । सकारस्य शकारः । तवर्गस्य चवर्गः । कस् चरति कश्चरति । कस्शूरः कश्शूरः । तत् चित्रं तच्चित्रम् । तत् शास्त्रं तच्छास्त्रम् ॥ ५ ॥

न शात् ॥ ६ ॥

शकारादुत्तरस्य तवर्गस्य चुत्वं न भवति । विश् नः विश्नः । प्रश् नः प्रश्नः ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्टुभिः ष्टुः स्तोः ॥ ७ ॥

सकारतवर्गयोः षकारटवर्गाभ्यां योगे ष्टुर्भवति। सकारस्य षकारः। तवर्गस्य टवर्गः। कस् षष्ठः कष्षष्ठः। कस् टीकते कष्टीकते। तत् टीकते तट्टीकते ॥ ७ ॥

तोर्लि लः ॥ ८ ॥

तवर्गस्य लकारे परे लकारो भवति। तत् लुनाति तल्लुनाति। भवान् लिखति भवाँल्लिखति। अन्तस्थाद्विप्रभेदा रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च। तत्र सानुनासिक एव नकारस्य लकारो भवति ॥ ८ ॥

न षि ॥ ९ ॥

षकारे तवर्गस्य ष्टुत्वं न भवति। भवान् षष्ठः भवान् षष्ठः ॥ ९ ॥

टोरन्त्यात् ॥ १० ॥

पदान्ते वर्तमानाट्टवर्गात्परस्य स्तोष्टुर्न भवति। षट् नर षण्नरः। षट् सीदन्ति षड्सीदन्ति १०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नः सक् छते ॥११॥

नान्तस्य पदस्य छते परे सगागमो भवति ॥

टित्किताबाद्यन्तयोर्वक्तव्यौ ॥ * ॥

टित्वादादौ कित्वादन्ते । राजन् चित्रं राजंश्चित्रम् । भवान् तनोति भवांस्तनोति ॥ ११ ॥

शे चक् वा ॥१२॥

नान्तस्य पदस्य शे परे वा चगागमो भवति । भवान् शूरः भवाञ्छूरः-भवाञ्शूरः-भवाञ्च्शूरः १२

ङणनो ह्रस्वाद् द्विः स्वरे ॥१३॥

ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवन्ति स्वरे परे पदान्ते । प्रत्यङ् इदं प्रत्यङ्ङिदम् । सुगण् इह सुगण्णिह । राजन् इह राजन्निह १३

छः ॥ १४ ॥

ह्रस्वादुत्तरश्छकारो द्विर्भवति ॥ १४ ॥

खसे चपा झसानाम् ॥१५॥

झसानां खसे परे चपा भवन्ति । तव छत्रं तवच्छत्रम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्वचि द्दीर्घादपि वक्तव्यः ॥ * ॥

क्रीछः क्रीच्छः म्लेछः म्लेच्छः ॥ १५ ॥

मोऽनुस्वारः ॥१६॥

मकारस्यानुस्वारो भवति पदान्ते च । तम् हसति तं हसति । पटुम् वथा पटुं वथा ॥१६॥

नश्चापदान्ते झसे ॥१७॥

नकारस्य मकारस्य चापदान्ते वर्तमानस्यानुस्वारो भवति झसे परे । यशान् सि यशांसि । पुम् भ्यां पुंभ्याम् ॥ १७ ॥

यमा यपेऽस्य वा ॥१८॥

अनुस्वारस्य मया वा भवन्ति यपे परे । अस्य यपस्य सवर्णः । तं करोति तङ्करोति । तं तनोति तन्तनोति । संयन्ता सँय्यन्ता ॥ १८ ॥

यवलपरे यवला वा ॥१९॥

अनुस्वारस्य यवलपरे यवला वा भवन्ति । संवत्सरः सँवत्सरः । यं लोकं यँल्लोकम् ॥ १९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष छन्दसि ॥२०॥

छन्दस्यनुस्वारो ष्वकारमापद्यते सशषहरेफेषु परतः । हंसः हष्ँसः ॥ २० ॥

इति व्यञ्जनसन्धिः ॥

अथ विसर्गसन्धिर्निगद्यते ॥

विसर्जनीयस्य सः ॥१॥

विसर्जनीयस्य सकारो भवति खसे परे । कः तनोति कस्तनोति ॥ १ ॥

सषशे वा ॥ २ ॥

विसर्जनीयस्य सषशे परे वा सकारो भवति । कः शेते कश्शेते । कः षण्डः कष्षण्डः । कः साधुः कस्साधुः ॥ २ ॥

कुप्वोः ≍क≍पौ वा ॥ ३ ॥

विसर्जनीयस्य कवर्गपवर्गसंबन्धिनि खसे परे ≍क≍पौ वा भवतः । कपावुच्चारणार्थौ । कः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

करोति क ⌣ करोति। कः पचति क ⌣ पचति। कः पठति क ⌣ पठति। वाचस्पत्यादयः संज्ञाशब्दा निपातात्साधवः । यल्लक्षणेनानुत्पन्नं तत्सर्वं निपातात्सिद्धम् ॥ ३ ॥

तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च ॥*॥

तत् करः तस्करः । बृहत् पतिः बृहस्पतिः । वाचः पतिः वाचस्पतिः ॥

अन्हो रो राचिषु ॥ ४ ॥

अह्नो विसर्जनीयस्य पदान्ते रो भवति रात्र्यादिगणवर्जितेषु परतः। अहः पतिः अहर्पतिः अहः गणः अहर्गणः। अरात्रिष्विति विशेषणात्। अहः रात्रं अहोरात्रम्। अहः रूपं अहोरूपम्। अहः रथन्तरं अहोरथन्तरम् ॥ ४ ॥

अतोऽत्युः ॥ ५ ॥

अकारात्परस्य विसर्जनीयस्य उकारो भवति अति परतः। कः अर्थः कोऽर्थः ॥ ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्वे ॥ ६ ॥

अकारात्परस्य विसर्जनीयस्य उकारो भवति ह्वे परे । कः गतः को गतः । देवः याति देवो याति । मनः रथः मनोरथः ॥ ६ ॥

आद्वे लोपश् ॥ ७ ॥

अवर्णात्परस्य विसर्जनीयस्य लोपश् भवति श्वे परे । देवाः अत्र देवा अत्र । वाताः वांति वाता वांति ॥ ७ ॥

स्वरे यत्वं वा ॥ ८ ॥

अवर्णात्परस्य विसर्जनीयस्य स्वरे परे यत्वं वा भवति । देवाः अत्र देवायत्र ॥ ८ ॥

भोसः भोस् भगोस् अघोस् ॥ ९ ॥

इत्येतस्मात्परस्य विसर्जनीयस्य लोपश् भवत्यवे परे । भोः एहि भो एहि । भगोः नमस्ते भगो नमस्ते । अघोः याहि अघो याहि ॥ ९ ॥

नामिनो रः ॥ १० ॥

नामिनः परस्य विसर्जनीयस्य रेफो भवति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवे परे। अग्निः अत्र अग्निरत्र। पटुः यजते पटुर्यजते ॥ १० ॥

उषसो रे वुधे ॥ ११ ॥

उषसो विसर्जनीयस्य रेफो भवति वुधे परे। उषः वुधः उषर्वुधः ॥ ११ ॥

रेफप्रकृतिकस्य खपे वा ॥ १२ ॥

रेफप्रकृतिकस्य विसर्जनीयस्य खपे परे वा रेफो भवति। गीः पतिः गीष्पतिः-गीर्पतिः ॥ १२ ॥

रः ॥ १३ ॥

रेफसंबन्धिनि विसर्जनीयस्य रेफो भवत्यवे परे। प्रातः अत्र प्रातरत्र। अन्तः गतः अन्तर्गतः ॥१३॥

रिलोपो दीर्घश्च ॥ १४ ॥

रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः। पुनः रमते पुनारमते। शुक्तिः रूप्यात्मना भाति शुक्ती रूप्यात्मना भाति ॥ १४ ॥

सैषाद्हसे ॥ १५ ॥

सशब्दादेषशब्दाच्च परस्य विसर्जनीयस्य लोपो भवति हसे परे। सः चरति स चरति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एषः हसति एष हसति। सैषादिति संहिता। सैष दाशरथी रामः सैष राजा युधिष्ठिरः॥ सैष कर्णो महात्यागी सैष भीमो महाबलः॥ इत्यादौ पादपूरणे सन्ध्यर्थः॥ १५॥

यदुक्तं लौकिकार्येह तद्वेदे बहुलं भवेत्॥ सैमां भूम्याददे सैषामित्यादीनामदुष्टता॥ १॥

क्वचिन्नामिनो लोपश्॥ १६॥

नामिनः परस्य विसर्जनीयस्य क्वचिल्लोपश् भवत्यवे परे। भूमिः आददे भूम्याददे॥ १६॥

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव॥ विधेर्विधान बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥ १॥ वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ॥ धातोस्तदर्थातिशयेन योगस्तद् च्यते पञ्चविधं निरुक्तम्॥ २॥ वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः॥ षोड शादौ विकारः स्याद्वर्णनाशः पृषोदरे॥ ३॥ वर्णनाशविकाराभ्यां धातोरतिशयेन यः। योगः स उच्यते प्राज्ञैर्मयूरभ्रमरादिषु॥ ४॥

इति विसर्गसन्धिः॥ ५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ षड्लिङ्गाः ॥

अथ विभक्तिर्विभाव्यते ॥ सा द्विधा स्यादिस्त्यादिश्च ॥

विभक्त्यन्तं पदम् ॥ १ ॥

तत्र स्यादिर्विभक्तिर्नाम्नो युज्यते ॥ १ ॥

अविभक्ति नाम ॥ २ ॥

विभक्तिरहितं धातुवर्जितं चार्थवच्छब्दरूपं नामोच्यते । कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञा इति केचित् ॥ २ ॥

तस्मात् सि औ जस् अम् औ शस् टा भ्यां भिस् ङे भ्यां भ्यस् ङसि भ्यां भ्यस् ङस् ओस् आम् ङि ओस् सुप् ॥ ३ ॥

तस्मान्नाम्नः पराः स्यादयः सप्त विभक्तयो भवन्ति । तत्राप्यर्थमात्रैकत्वविवक्षायां प्रथमैकवचने देव सि इति स्थिते । इकार उच्चारणार्थः ॥ ३ ॥

सोर्विसर्गः ॥ ४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सकाररेफयोर्विसर्जनीयादेशो भवति अधातो रसि पदान्ते च । देवः । द्वित्वविवक्षायां देवौ । बहुत्वविवक्षायां प्रथमाबहुवचने जस् । जसो जस्यंत्संज्ञायां तस्य लोपः । प्रयोजनं जसीति विशेषणार्थम् । देव अस् इति स्थिते । दीर्घविसर्गौ देवाः ।

अकाराज्जसो असुक् क्वचिद्वक्तव्यः ॥ * ॥

देवासः ब्राह्मणासः । द्वितीयैकवचने देव अम् इति स्थिते ॥ ४ ॥

अम्शसोरस्य समानादुत्तरयोः ॥५॥

अम्शसोरकारस्य लोपो भवत्यधातोः । देवम् देवौ । बहुवचने देव शस् इति स्थिते । शकारः शसीति विशेषणार्थः ॥ ५ ॥

सो नः पुंसः ॥ ६ ॥

पुल्लिङ्गात् समानादुत्तरस्य सकारस्य नकारादेशो भवति ॥ ६ ॥

शसि ॥ ७ ॥

शसि परे पूर्वस्य स्वरस्य दीर्घो भवति । यदादेशस्तद्वद्भवति न तु वर्णमात्रविधौ । देवान् । तृतीये-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कावचने देव टा इति स्थिते। टकारोऽनुबन्धः टेनेति विशेषणार्थः॥ ७॥

टेनः॥ ८॥

अकारात्परष्टा इनो भवति। देवेन॥ ८॥

आद्भि॥९॥

अकारस्य आकारादेशो भवति भकारे परे। देवाभ्याम्॥ ९॥

ऽभ्यः॥ १०॥

अकारात्परस्य भिसो भकारस्याकारादेशो भवति। अइ ए। ऐऐ। विसर्जनीयः। देवैः
अकारस्य भिसि छन्दस्येकारो वा वक्तव्यः॥ *
देवेभिः। कर्णेभिः। चतुर्थ्येकवचने। देव ङे इति स्थिते। ङकारो ङित्कार्यार्थः सर्वत्र॥ १०॥

ङेरक्॥ ११॥

अकारात्परस्य ङे इत्यतस्याकागमो भवति। कित्वादन्त ए अय्। दीर्घः। देवाय देवाभ्याम्। पूर्ववत्। चतुर्थीबहुवचने। देव भ्यस इति स्थिते॥ ११॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ए स्भि बहुत्वे ॥ १२ ॥

अकारस्य एत्वं भवति सकारे भकारे च परे बहुत्वे सति । देवेभ्यः । पञ्चम्येकवचने । देव ङसि इति स्थिते ॥ १२ ॥

ङसिरत् ॥ १३ ॥

अकारात्परो ङसिरद्भवति । दीर्घः । देवात् देवाभ्यां देवेभ्यः । षष्ठ्येकवचने । देव ङस् इति स्थिते ॥ १३ ॥

ङस् स्य ॥ १४ ॥

अकारात्परो ङस् स्य भवति । देवस्य । षष्ठीद्विवचने देव ओस् इति स्थिते ॥ १४ ॥

ओसि ॥ १५ ॥

अकारस्य ओसि परे एत्वं भवति । देवयोः ॥ १५ ॥

नुडामः ॥ १६ ॥

समानात्परस्यामो नुडागमो भवति । टित्वादादौ । टकार उच्चारणार्थः ॥ १६ ॥

नामि ॥ १७ ॥

नामि परे पूर्वस्य दीर्घो भवति देवानाम् । सप्तम्ये-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कवचने देव ङि इति स्थिते । अद्गुए । देवे देव-
योः । पूर्ववत् । सप्तमीवहुवचने । देव सुप् इ-
ति स्थिते । पकारस्येत्संज्ञायां लोपः । ए स्मि
वहुत्व ॥ १७ ॥

किलात् षः सःकृतस्य ॥ १८ ॥

कवर्गादिलाच्च प्रत्याहारादुत्तरस्य केनचित् सूत्रेण
कृतस्य सकारस्य षकारादेशो भवति। देवेषु॥ १८॥

आमन्त्रणे सिद्धिः १९ ॥

आमन्त्रणमाभिमुखीकरणं तस्मिन्नर्थे विहितः सि-
द्धिसंज्ञो भवति ॥ १९ ॥

समानाद्धेर्लोपोऽधातोः ॥ २० ॥

समानादुत्तरस्य धेर्लोपो भवत्यधातोः । आभिमु-
ख्याभिव्यक्तये हेशब्दस्य प्राक्प्रयोगः । हे देव हे
देवौ हे देवाः । एवं वटपटस्तम्भकुम्भादयोऽप्यका-
रान्ताः पुल्लिङ्गाः । अकारान्तानामपि सर्वादीनां
तु विशेषः । सर्व विश्व उभ उभय अन्य अन्यतर
इतर डतर डतम कतर कतम सम सिम नेम
एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व
अन्तर त्यद् तद् एतद् इदम् अदस् द्वि किम् यु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्मद् अस्मद् भवतु । एते सर्वादयस्त्रिलिङ्गाः । तत्र पुंलिङ्गत्वेन रूपं ज्ञेयम् ॥ २० ॥

जसी ॥ २१ ॥

सर्वादेरकारान्तात्परो जस ई भवति । सर्वः सर्वौ सर्वे । सर्वम् सर्वौ सर्वान् ॥ २१ ॥

षुर्नो णोऽनन्ते ॥ २२ ॥

षकाररेफऋवर्णेभ्यः परस्य नकारस्य णकारादेशो भवति । अन्ते स्थितस्य न भवति सर्वानित्यादौ ॥ २२ ॥

अवकुप्वन्तरेऽपि ॥ २३ ॥

अवप्रत्याहारेण कवर्गेण पवर्गेण च मध्ये व्यवधानेऽपि भवति नान्येन । सर्वेण सर्वाभ्याम् सर्वैः ॥ २३ ॥

सर्वादेः स्मट् ॥ २४ ॥

सर्वादेरकारान्तात्परस्य चतुर्थ्येकवचनस्य स्मडागमो भवति । सर्वस्मै सर्वाभ्याम् सर्वेभ्यः । पञ्चम्येकवचने । सर्व ङसि इति स्थिते ॥ २४ ॥

अतः सर्वादेः ॥ २५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अकारान्तात्परस्यात: स्मडागमो भवति। सर्व-स्मात् सर्वाभ्याम् सर्वेभ्यः। सर्वस्य सर्वयोः॥२५॥

सुडामः॥ २६॥

सर्वादेः परस्याम. सुडागमो भवति। सर्वेषाम् ॥ २६ ॥

ङि स्मिन्॥ २७॥

सर्वादेरकारान्तात्परो ङि स्मिन् भवति। सर्व-स्मिन् सर्वयोः सर्वेषु। एवं विश्वादीनामेकशब्द-पर्यंतानां रूपं ज्ञेयम्। डतरडतमो विहाय। तौ-प्रत्ययौ ततस्तदन्ताः शब्दा ग्राह्याः॥

पूर्वादीनां तु नवानां जसि ईकारो वा वक्तव्यः॥

पूर्वे पूर्वाः परे पराः इत्यादि॥

ङसिङ्योः स्मात्स्मिनौ वा वक्तव्यौ॥ *॥

पूर्वस्मात् पूर्वात्। पूर्वस्मिन् पूर्वे इत्यादि॥

प्रथमचरमतयाल्पार्द्धकतिपयनेमानां जसीका-रोवा वक्तव्यः॥ *॥

प्रथमे प्रथमाः। चरमे चरमाः शेषं देववत्। तयायडौ प्रत्ययौ॥

तीयस्य सर्वशब्दवद्रूपं ङित्सु वा वक्तव्यम्॥*॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयस्मै द्वितीयाय । द्वितीयस्मात् द्वितीयात् । द्वितीयस्मिन् द्वितीये एवं तृतीयः । उभशब्दो नित्यं द्विवचनान्तः । उभौ उभौ उभाभ्याम् उभाभ्याम् उभाभ्याम् उभयोः । उभयोः । उभयशब्दस्य द्विवचनाभावादेकवचनबहुवचने भवतः । उभयः । उभयं उभय उभयान् । उभयन उभयैः । उभयस्मै उभयेभ्यः इत्यादि ॥ अकारान्तः पुल्लिङ्गो मासशब्दः ॥ २७ ॥

मासस्या लोपो वा ॥ २८ ॥

मासशब्दस्याकारस्य लोपो वा भवति सर्वासु विभक्तिषु परतः ॥ २८ ॥

हसे पः सेर्लोपः ॥ २९ ।

हसन्तादीवन्ताच्च परस्य सेर्लोपो भवति । माः मासः मासौ मासौ मासः मासाः । मासं मासं मासौ मासौ मासः मासान् । मासा मासेन माभ्यां मासाभ्यां माभिः मासैः । मासे मासाय माभ्यां मासाभ्यां माभ्यः मासेभ्यः । मासः मासात् माभ्यां मासाभ्यां माभ्यः मासेभ्यः । मासः मासस्य मासोः मासयोः मासाम् मासानाम् । मासि मासे मासोः मासयोः मास्सु मासेषु । हे माः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हे मास हे मासौ हे मासौ हे मासः हे मासाः । आकारान्तः पुंल्लिङ्गः सोमपाशब्दः । सोमपाः सोमपौ सोमपाः । अधातोरिति विशेषणात्सेर्लोपो नास्ति । हे सोमपाः । सोमपां सोमपौ । बहुवचने सोमपा अस् इति स्थिते ॥ २९ ॥

अतो धातोर्लोपः ॥ ३० ॥

धातुसम्बन्धिन आकारस्य लोपो भवति शसादौ स्वरे परे । सोमपः । सोमपा सोमपाभ्यां सोमपाभिः । सोमपे सोमपाभ्यां सोमपाभ्यः । सोमपः सोमपाभ्यां सोमपाभ्यः । सोमपः सोमपोः सोमपाम् । सोमपि सोमपोः सोमपासु । एवं कीलालपाशंखध्माप्रभृतयः ॥ ३० ॥

इकारान्तः पुंल्लिङ्गो हरिशब्दः । प्रथमैकवचने हरिः ॥

औ यू ॥ ३१ ॥

इकारान्तादुकारान्ताच्च परः औ यू आपद्यते । ईऊ भवतः । हरी ॥ ३१ ॥

ए ओ जसि ॥ ३२ ॥

इकारान्तस्य उकारान्तस्य च जसि परे एकार

ओकारश्च भवति । हरयः ॥ ३२ ॥

धौ ॥ ३३ ॥

इकारान्तस्य उकारान्तस्य च धिविषये एकार ओकारश्च भवति । हे हरे हे हरी हे हरयः । हरिं हरी हरीन् ॥ ३३ ॥

टा ना स्त्रियाम् ॥ ३४ ॥

इकारान्तादुकारान्ताच्च परष्टा ना भवत्यस्त्रियाम् । हरिणा हरिभ्यां हरिभिः ॥ ३४ ॥

ङिति ॥ ३५ ॥

इकारान्तस्य उकारान्तस्य च ङिति परे एकार ओकारश्च भवति । हरये हरिभ्यां हरिभ्यः ॥ ३५ ॥

ङसिङसोरस्य ॥ ३६ ॥

एदोद्भ्यां परस्य ङसिङसोरकारस्य लोपो भवति ।* हरेः हरिभ्यां हरिभ्यः । हरेः हर्योः हरीणाम् ॥ ३६ ॥

ङेरौ ङित् ॥ ३७ ॥

इदुद्भ्यामुत्तरस्य ङेरौ भवति स च ङित् ॥ ३७ ॥

ङिति टेः ॥ ३८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ङिति परे टेर्लोपो भवति। हरौ हर्योः हरिषु। एवमग्निगिरिरविकविप्रभृतयः। एतैरेव सूत्रैः सिध्यन्ति। उकारान्ताश्च विष्णुवायुभानुप्रभृतयः एतैरेव सूत्रैः सिध्यन्ति। भानुः भानू भानवः। भानुं भानू भानून्। भानुना भानुभ्यां भानुभिः। भानवे भानुभ्यां भानुभ्यः। भानोः भानुभ्यां भानुभ्यः। भानोः भान्वोः भानूनाम्। भानौ भान्वोः भानुषु। हे भानो इत्यादि॥ सखिशब्दस्य भेदः॥ ३८॥

सेर्डाऽधेः॥ ३९॥

सखिशब्दात्परस्य सेरधेर्डा भवति स च डित्। डित्त्वाट्टिलोपः। सखा। अधेरिति विशेषणादेकारो धिविषये। हे सखे॥ ३९॥

ऐ सख्युः॥ ४०॥

सखिशब्दस्यैकारो भवति पञ्चसु परेषु। षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः॥ ४०॥

द्विवचनस्या वा छन्दसि॥ ४१॥

द्विवचनस्य औ वा भवति वेदे। सखायौ सखायः। सखायं सखायौ सखीन्॥ ४१॥

सखिपत्योरीक् ॥ ४२ ॥

सखिपतिशब्दयोरीगागमो भवति टाङेङिषु परतः । दीर्घत्वान्न ना । सख्या । आगमजमनित्यम् । सखिना पतिना । सखिभ्यां सखिभिः । सख्ये सखिभ्यां सखिभ्यः ॥ ४२ ॥

ऋङ् ङे ॥ ४३ ॥

सखिपतिशब्दयोर्ऋगागमो भवति ङसिङसोरकारे स च ङित् । सख्युः सखिभ्यां सखिभ्यः । सख्युः सख्योः सखीनाम् । सप्तम्येकवचने ॥ ङेरौदित्यौकारे कृते सखिपतिशब्दयोरीगागमो भवति । सख्यौ सख्योः सखिषु । पतिशब्दस्य प्रथमाद्वितीययोर्हरिशब्दवत्प्रक्रिया । तृतीयादौ तु सखिशब्दवत्प्रक्रिया । पतिरसमास एव सखिवद्वक्तव्यः । ततः समासान्तस्य नादयो भवन्ति । प्रजापतिना प्रजापतये इत्यादि । द्विशब्दो नित्यं द्विवचनान्तः । द्वि औ इति स्थिते ॥ ४३ ॥

त्यदादेष्टेरः स्यादौ ॥ ४४ ॥

त्यदादेष्टेरकारो भवति स्यादौ परे । द्वौ द्वौ द्वाभ्यां द्वाभ्यां द्वाभ्यां द्वयोःद्वयोः । त्यदादीनां घेर-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावः। त्रिशब्दो नित्यं बहुवचनान्तः। त्रिजस् इति स्थिते। त्रयः त्रीन् त्रिभिः त्रिभ्यः त्रिभ्यः ॥४४॥

त्रेरयङ् ॥ ४५ ॥

त्रिशब्दस्यायङादेशो भवति नामि परे ङिदन्तस्य वक्तव्यः। त्रयाणाम् त्रिषु ॥ कतिशब्दो नित्यं बहुवचनान्तः।

जस्शसोर्लुक् ॥ * ॥

कतिशब्दाज्जश्शसोर्लुग्वक्तव्यः। लुकि न तन्निमित्तम्। कति कति कतिभिः कतिभ्यः कतिभ्यः कतीनां कतिषु। त्रिषु लिङ्गेषु चायं सरूपः ॥ ४५ ॥

ईकारान्तः पुंल्लिङ्गः सुश्रीशब्दः ॥

य्वोर्धातोरियुवौ स्वरे ॥ ४६ ॥

धातोरीकारोकारयोरियुवौ भवतः स्वरे परे। सुश्रीः सुश्रियौ सुश्रियः। हे सुश्रीः हे सुश्रियौ हे सुश्रियः। सुश्रियं सुश्रियौ सुश्रियः। सुश्रिया सुश्रीभ्यां सुश्रीभिः। सुश्रिये सुश्रीभ्यां सुश्रीभ्यः। सुश्रियः सुश्रीभ्यां सुश्रीभ्यः। सुश्रियः सुश्रियोः सुश्रियाम्। सुश्रियि सुश्रियोः सुश्रीषु। तथैव सुधीशब्दः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऊकारान्तः पुंलिङ्गः स्वयम्भूशब्दः। स्वयम्भूः स्वयम्भुवौ स्वयम्भुवः। स्वयम्भुवं स्वयम्भुवौ स्वयम्भुवः। स्वयम्भुवा स्वयम्भूभ्यां स्वयम्भूभिः। स्वयम्भुवे स्वयम्भूभ्यां स्वयम्भूभ्यः। स्वयम्भुवः स्वयम्भूभ्यां स्वयम्भूभ्यः। स्वयम्भुवः। स्वयम्भुवोः स्वयम्भुवाम्। स्वयम्भुवि स्वयम्भुवोः स्वयम्भूषु। सेनानीशब्दस्याविशेषो हसादौ। स्वरादौ तु विशेषः। सेनानी णी इति स्थिते ॥ ४६ ॥

य्वौ वा ॥ ४७ ॥

धातोरवयवसंयोगः पूर्वो यस्मादीकारादूकारान्नास्ति तदन्तस्यानेकस्वरस्य ईकारस्य ऊकारस्य च यकारवकारौ भवतः स्वरे परे। वर्षाभूपुनर्भूव्यतिरिक्तभूशब्दसुधीशब्दौ वर्जयित्वा। वाग्रहणादियं विवक्षा। सेनानीः सेनान्यौ सेनान्यः। हे सेनानीः हे सेनान्यौ हे सेनान्यः। सेनान्यं सेनान्यौ सेनान्यः। सेनान्या सेनानीभ्यां सेनानीभिः। सेनान्ये सेनानीभ्यां सेनानीभ्यः। सेनान्यः सेनानीभ्यां सेनानीभ्यः। सेनान्यः सेनान्योः ॥

सेनान्यादीनां वामो नुट् वक्तव्यः ॥ * ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सेनान्यां सेनानीनाम् ॥ ४७ ॥

आम्ङेः ॥ ४८ ॥

आवन्तादीवन्तान्नीशब्दाच्चोत्तरस्य ङेरामादेशो भवति । सेनान्यां सेनान्योः सेनानीषु । वातप्रमीशब्दस्य भेदः । वातप्रमीः वातप्रम्यौ वातप्रम्यः । हे वातप्रमीः हे वातप्रम्यौ हे वातप्रम्यः । वातप्रमीं वातप्रम्यौ वातप्रमीन् । वातप्रम्या वातप्रमीभ्यां वातप्रमीभिः । वातप्रम्ये वातप्रमीभ्यां वातप्रमीभ्यः । वातप्रम्यः वातप्रमीभ्यां वातप्रमीभ्यः । वातप्रम्यः वातप्रम्योः । आमि नुट् । वातप्रमीनाम् । ङौ तु सवर्णे दीर्घः । वातप्रमी वातप्रम्योः वातप्रमीषु । एवं ग्रामणीप्रभृतयः सेनानीवत् । ऊकारान्ताश्च यवलूप्रभृतयः ॥ ऋकारान्तः पुंल्लिङ्गः पितृशब्दः ॥ ४८ ॥

सेरा ॥ ४९ ॥

ऋकारान्तात्परस्य सेरा भवति स च डित् । डित्वाट्टिलोपः । पिता ॥ ४९ ॥

अर् पञ्चसु ॥ ५० ॥

ऋकारोऽर्भवति पञ्चसु परेषु स च डित् । हे पि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तः हे पितरौ हे पितरः। पितरं पतरौ पितॄन्। पित्रा पितृभ्यां पितृभिः। पित्रे पितृभ्यां पितृभ्यः। पितुः पितृभ्यां पितृभ्यः। पितुः पित्रोः पितॄणाम् ॥ ५० ॥

ङौ ॥ ५१ ॥

ऋकारस्यार्भवति ङौ परे। पितरि पित्रोः पितृषु। एवं जामातृभ्रात्रादयः। नृशब्दः। ना नरौ नरः। नरं नरौ नॄन्। न्रा नृभ्यां नृभिः। न्रे नृभ्यां नृभ्यः नुः नृभ्यां नृभ्यः। नुः न्रोः ॥ ५१ ॥

नुर्वा नामि दीर्घः ॥ ५२॥

नृशब्दस्य नामि परे वा दीर्घो भवति। नॄणां-नृणाम्। नरि न्रोः नृषु। हे नः हे नरौ हे नरः। कर्तृशब्दस्य पञ्चसु विशेषः ॥ ५२ ॥

स्तुरार् ॥ ५३ ॥

सकारतृप्रत्ययसंबन्धिन ऋकारस्यार्भवति पञ्चसु परेषु। कर्तृ सि इति स्थिते। यदादेशस्तद्वद्भवति। सेरा। डित्वाट्टेर्लोपः। कर्ता कर्तारौ कर्तारः। हे कर्तः हे कर्तारौ हे कर्तारः। कर्तारं कर्तारौ कर्तॄन्। कर्त्रा कर्तृभ्यां कर्तृभिः। क-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्त्रे कर्तृभ्यां। कर्तृभ्यः। कर्तुः कर्तृभ्यां कर्तृभ्यः। कर्तुः कर्त्रोः कर्तॄणां। कर्तरि कर्त्रोः कर्तृषु। एवं नप्तृत्वोतृप्रशास्तृप्रभृतयः। उकारान्तस्य क्रोष्टुशब्दस्य भेदः॥

उकारान्तस्यापि क्रोष्टुशब्दस्य पञ्चस्वधिषु तृप्रत्ययान्तस्यैव रूपं वक्तव्यम्॥ *॥

क्रोष्टा क्रोष्टारौ क्रोष्टारः। क्रोष्टारं क्रोष्टारौ। शसि तृप्रत्ययान्तवद्भावाभावात् क्रोष्टून्।

तृतीयादौ स्वरादौ तृप्रत्ययान्तता वा वक्तव्या॥ *॥

क्रोष्ट्रा क्रोष्टुना क्रोष्टुभ्यां क्रोष्टुभिः। क्रोष्ट्रे क्रोष्टवे क्रोष्टुभ्यां क्रोष्टुभ्यः। क्रोष्टुः क्रोष्टोः क्रोष्टुभ्यां क्रोष्टुभ्यः। क्रोष्टुः क्रोष्टोः क्रोष्ट्रोः क्रोष्ट्वोः क्रोष्टूनाम्। नुडागमे कृते झसादित्वात्तृज्वद्भावो नास्ति। कृताकृतप्रसङ्गी यो विधिः सनित्यः। नित्यानित्ययोर्मध्ये नित्यविधिर्बलवान्। क्रोष्टरि क्रोष्टौ क्रोष्ट्रोः-क्रोष्ट्वोः क्रोष्टुषु। ऋकारान्ता लृकारान्ता एकारान्ताश्चाप्रसिद्धाः॥ ५३॥

ऐकारान्तः पुंल्लिङ्गः रैशब्दः॥

रैस्भि॥ ५४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रैशब्दस्याकारादेशो भवति सकारभकारादौ विभक्तौ परतः। सुराः। स्वरादौ सर्वत्रायादेशः। सुरायौ सुरायः। हे सुराः हे सुरायौ हे सुरायः। सुरायं सुरायौ सुरायः। सुराया सुराभ्यां सुराभिरित्यादि ॥ ५४ ॥

ओकारान्तः पुंलिङ्गो गोशब्दः।

ओरौ ॥ ५५ ॥

ओकारस्यौकारादेशो भवति पञ्चसु परेषु। गौः गावौ गावः। हे गौः हे गावौ हे गावः ॥ ५५ ॥

आम् शसि ॥ ५६ ॥

ओकारस्यात्वं भवति अमि शसि च परे। गां गावौ गाः। गवा गोभ्यां गोभिः। गवे गोभ्यां गोभ्यः। ङसीत्यकारलोपः। गोः गोभ्यां गोभ्यः। गोः गवोः गवाम्। गवि गवोः गोषु। एवं सुद्योशब्दः॥ ग्लौशब्दस्य हसादावविशेषः। स्वरादावावादेशः॥ ग्लौः ग्लावौ ग्लावः। ग्लावं ग्लावौ ग्लावः। ग्लावा ग्लौभ्यामित्यादि ॥ ५६ ॥

इति स्वरान्ताः पुंल्लिङ्गाः ॥ ६ ॥

अथ स्वरान्ताःस्त्रीलिङ्गाः प्रदर्श्यन्ते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथाबन्तो गङ्गाशब्दः ॥

आबतः स्त्रियाम् ॥ १ ॥

आकारान्तान्नाम्नः स्त्रियां वर्तमानादाप्प्रत्ययो भवति ॥ १ ॥

आपः ॥ २ ॥

आबन्तात्परस्य सेर्लोपो भवति । गङ्गा ॥ २ ॥

औरी ॥ ३ ॥

आबन्तात्पर औ ईकारमापद्यते अ इ ए । गङ्गे गङ्गाः ॥ ३ ॥

धिरिः ॥ ४ ॥

आबन्तात्परो धिरिर्भवति । हे गङ्गे ॥ ४ ॥

अम्बादिनां धौ ह्रस्वः ॥ ५ ॥

अम्बादीनां धौ परे ह्रस्वो भवति । हे अम्ब हे अक्क हे अल्ल ।

असंयुक्तानां डलकवतीनां प्रतिषेधो वाच्यः ॥*॥ हे अम्बाडे हे अम्बाले हे अम्बिके इत्यादौ ह्रस्वो न भवति । गङ्गा गङ्गे गङ्गाः ॥ ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

टौसोरे ॥ ६ ॥

आवन्तस्य टौसोः परयोरेत्वं भवति । अयादेशः।
गङ्गया गङ्गाभ्यां गङ्गाभिः ॥ ६ ॥

ङिता यट् ॥ ७ ॥

आवन्तात्परेषां ङे ङसि ङस् ङि इत्येतेषां यडा-
गमो भवति । टकारः स्थाननियमार्थः । गङ्गायै
गङ्गाभ्यां गङ्गाभ्यः । गङ्गायाः गङ्गाभ्यां गङ्गाभ्यः।
गङ्गायाः गङ्गयोः । आवन्तादीवन्तादामो नुट् व-
क्तव्यः । गङ्गानाम् । आम् ङे । गङ्गायां गङ्गयोः
गङ्गासु । एवं श्रद्धामेधाशालामालाहिलोदोलाप्रभृ-
तयः। सर्वादीनां तु ङित्सु विशेषः ॥ ७ ॥

यटोऽच्च ॥ ८ ॥

आवन्तात्सर्वादेः परस्य यटः सुडागमो भवति पू-
र्वस्य चापोऽकारो भवति । सर्वस्यै सर्वाभ्यां स-
र्वाभ्यः । सर्वस्याः सर्वाभ्यां सर्वाभ्यः । सर्वस्याः
सर्वयोः सर्वासाम् । सर्वस्यां सर्वयोः सर्वासु ।
आकारान्तो जराशब्दः ॥

जरायाः स्वरादौ जरस् वा वक्तव्यः ॥ * ॥

जरा जरसौ जरे जरसः जराः। जरसं जरां ज-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रसौ जरे जरसःजराः। जरसा-जरया जराभ्यां जराभिः। जरसे-जरायै जराभ्यां जराभ्यः। जरसः जरायाः जराभ्यां जराभ्यः।जरसः जरायाः जरसोः-जरयोः जरसां-जराणाम्। जरसि-जरायां जरसोः-जरयोःजरासु। हेजरे हे जरसौ हेजरे हे जरसःहे जराः। इकारान्तः स्त्रीलिङ्गो वृद्धिशब्दः। तस्य च प्रथमाद्वितीययोर्हरिशब्दवत्प्रक्रिया। वृद्धिः वृद्धी वृद्धयः। वृद्धिं वृद्धी वृद्धीः. स्त्रीत्वाच्छसो नत्वाभावः। वृद्ध्या वृद्धिभ्यां वृद्धिभिः ८॥

इदुद्भ्याम्॥ ९॥

स्त्रियां वर्तमानाभ्यामिकारोकाराभ्यां परेषां ङितां वचनानां वा अडागमो भवति। वृद्ध्यै वृद्धये वृद्धिभ्यां वृद्धिभ्यः। वृद्ध्याः-वृद्धेः वृद्धिभ्यां वृद्धिभ्यः। वृद्ध्याःवृद्धेः वृद्ध्योः वृद्धीनाम्॥ ९॥

स्त्रियां य्वोः॥ १०॥

इश्च उश्च यू तस्मात् इवर्णान्तादुवर्णान्ताच्च परस्य ङेरामादेशो भवति। वृद्ध्याम्। अडागमाभावे आमोऽप्यभावः। वृद्धौ वृद्ध्योः वृद्धिषु। एवं मतिभूतिविभूतिधृतिरुचि कृतिसिद्धिशान्तिक्षान्तिभ्रान्तिख्यातिशक्तिप्रभृतयः।एवं धेनुरज्जुतनुप्रभृतयः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्त्रीलिङ्गाः। धेनुः धेनू। धेनवः धेनुं धेनू धेनूः। धेन्वा धेनुभ्यां धेनुभिः। धेन्वै-धेनवे धेनुभ्यां धेनुभ्यः। धेन्वाः-धेनोः धेनुभ्यां धेनुभ्यः। धेन्वाः-धेनोः धेन्वोः धेनूनाम्। धेन्वां-धेनौ धेन्वोः धेनुषु ॥ १० ॥

ईकारान्तः स्त्रीलिङ्गो नदीशब्दः ॥

हसे पस्सेर्लोपः ॥ ११ ॥

हसान्तादवन्ताच्च परस्य सेर्लोपो भवति। नदी नद्यौ नद्यः ॥ ११ ॥

धौ ह्रस्वः ॥ १२ ॥

ईवर्णोवर्णयोरधातोः स्त्रियां धौ परे ह्रस्वो भवति। हेनदि हे नद्यौ हेनद्यः। नदीं नद्यौ नदीः नद्या नदीभ्यां नदीभिः ॥ १२ ॥

ङितामट् ॥ १३ ॥

स्त्रियामीकारान्तादूकारान्ताच्च परेषां ङितां वचनानामडागमो भवति ॥ नद्यै नदीभ्यां नदीभ्यः। नद्याः नदीभ्यां नदीभ्यः। नद्याः नद्योः नदीनाम्। नद्यां नद्योः नदीषु। एवं गौरीसरस्वतीब्राह्मणीकुमारीकिशोरीकलभीपार्वतीभवानीप्रभृतयः। लक्ष्मीशब्दस्येवन्तत्वाभावात्सेर्लोपो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नास्ति। लक्ष्मीः लक्ष्म्यौ लक्ष्म्यः। शेषं नदीवत्। हे लक्ष्मि। स्त्रीशब्दस्य ईवन्तत्वात्सेर्लोपोऽस्ति। स्त्री ॥ १३ ॥

स्त्रीभ्रुवोः ॥ १४ ॥

स्त्रीशब्दस्य भूशब्दस्य च इयुवौ भवतः स्वरे परे। स्त्रियौ स्त्रियः। हे स्त्रि हे स्त्रियौ हे स्त्रियः॥ १४॥

वाम्शसि ॥ १५ ॥

स्त्रीशब्दस्य अमि शसि च परे वा इयादेशो भवति। स्त्रियं-स्त्रीं स्त्रियौ स्त्रीः-स्त्रियः। स्त्रिया स्त्रीभ्यां स्त्रीभिः। स्त्रीषु। शेषंनदीवत्। श्रीः श्रियौ श्रियः। श्रियं श्रियौ श्रियः। श्रिया श्रीभ्यां श्रीभिः ॥ १५ ॥

वेयुवः ॥ १६ ॥

इयुवन्तात् स्त्रियां वर्तमानानां ङितां वचनानां याडागमो भवति। श्रियास्तु नित्यम्। श्रियै-श्रिये श्रीभ्यां श्रीभ्यः। श्रियः-श्रियाः श्रीभ्यां श्रीभ्यः। श्रियः-श्रियाः श्रियोः ॥

श्रियादीनां वामो नुट् वक्तव्यः ॥ * ॥

श्रियां श्रीणाम्। ङौ परेऽडागमाभावे ऽामोऽप्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावः । श्रियां-श्रियि श्रियोः श्रीषु । हे श्रीः । एवं ह्रीधीप्रभृतयोऽप्यनीवन्ताः । एवं भूशब्दो भ्रूशब्दवत् । वधूजम्ब्वादीनां नदीशब्दवत् । वधूः वध्वौ वध्वः । वधूं वध्वौ वधूः । जम्बूः जम्ब्वौ जम्ब्वः । हे जम्बु हे जम्ब्वौ हे जम्ब्वः । ऋकारान्तो मातृशब्दः । माता मातरौ मातरः । मातरं मातरौ मातॄः । शसीति दीर्घत्वम् । शेषं पितृवत् । रैशब्दः सुरैशब्दवत् । नौशब्दो ग्लौशब्दवत् । गोशब्दस्तु पूर्ववत् ॥ १६ ॥

इति स्वरान्ताः स्त्रीलिङ्गाः ॥ ७ ॥

अथ स्वरान्ता नपुंसकलिङ्गाः प्रदर्श्यन्ते ॥

अकारान्तो नपुंसकः कुलशब्दः । तस्य प्रथमाद्वितीयैकवचने ॥

अतोऽम् ॥ १ ॥

अकारान्तान्नपुंसकलिङ्गात्परयोः स्यमोरम् भवति अधौ । अतोऽम् ग्रहणं लुग्व्यावृत्त्यर्थम् । अम् शसोरस्य । कुलम् ॥ १ ॥

ईमौ ॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नपुंसकलिङ्गात्पर औ ईकारमापद्यते। कुले॥२॥

जश्शसोः शिः॥ ३॥

नपुंसकलिङ्गात्परयोर्जश्शसोः शिर्भवति। शकारः सर्वादेशार्थः॥ ३॥
गुरुः शिच्च सर्वस्य वक्तव्यः॥ *॥

नुमयमः॥ ४॥

नपुंसकस्य नुमागमो भवति शौ परे यमप्रत्याहारान्तस्य न भवति॥ ४॥
मिदन्त्यात् स्वरात् परो वक्तव्यः॥ *॥

नोपधायाः॥ ५॥

नान्तस्योपधाया दीर्घो भवति शौ परे धिवर्जितेषु पञ्चसु नाम्नि च नखीति। कुलानि। हे कुल हे कुले हे कुलानि। पुनरपि कुलं कुले कुलानि शेषं देववत्। एवं मूलफलपत्रपुष्पकुटुम्बादयः॥ ५॥

इत्वन्यादेः॥ ६॥

अन्यादिगणात् परयोः स्वमोः ऋतुर्भवति। शकारः शित्कार्यार्थः। उकार उच्चारणार्थः॥ ६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वावसाने ॥ ७ ॥

अवसाने वर्तमानानां झसानां जवा भवन्ति च-
पा वा ॥ अन्यत्-अन्यद् अन्ये अन्यानि । पुनर-
पि अन्यत्-अन्यद् अन्ये अन्यानि। अन्यतरत्-अ-
न्यतरद् अन्यतरे अन्यतराणि ॥ २ ॥ इतरत्-इ-
तरद् इतरे इतराणि ॥ २ ॥ कतरत्-कतरद् का-
तरे कतराणि ॥ २ ॥ कतमत्-कतमद् क तमे क-
तमानि ॥ २ ॥ शेषं सर्वशब्दवत् एते चाग्या-
दयः ॥ ७ ॥

॥ इकारान्तोऽस्थिशब्दः ॥

नपुंसकात् स्यमोर्लुक् ॥ ८ ॥

नपुंसकलिङ्गात् परयोः स्यमोर्लुग्भवति । अस्थि८

स्वृणाम् ॥ ९ ॥

इश्च उश्च ऋश्च स्वः । तेषां स्वृणां नपुंसके धौ वा
गुणो वक्तव्यः । हे अस्थि-हे अस्थे हे अस्थिनी हे
अस्थीनि ।

उक्तं हि ।

संबोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथा-
प्यदन्तम् ॥ माध्यन्दिनिर्वष्टि गुणंत्विगन्ते नपुंसके

व्याघ्रपदां वरिष्ठः ॥ ९ ॥

नामिनः स्वरे ॥ १० ॥

नाम्यन्तस्य नपुंसकलिङ्गस्य नुमागमो भवति स्वरे परे । इमी अस्थिनी ॥ १० ॥

अच्चास्थ्नां शसादौ ॥ ११ ॥

अस्थ्यादीनां नुमागमो भवति इंकारस्य चाकारो भवति शसादौ स्वरे परे ॥ ११ ॥

अल्लोपः स्वरे ॥ १२ ॥

अम्वयुक्ताच्छसादौ नान्तस्योपधाया अकारस्य लोपो भवति शसादौ स्वरे परे । मकारवकारान्तसंयोगादुत्तरस्य न भवति । अस्थ्ना अस्थिभ्यां अस्थिभिः । अस्थ्ने अस्थिभ्यां अस्थिभ्यः । अस्थ्नः अस्थिभ्यां अस्थिभ्यः । अस्थ्नः अस्थ्नोः अस्थ्नाम् ॥ १२ ॥

वेङ्योः ॥ १३ ॥

ङिङ्योः परयोर्वा अकारस्य लोपो भवति । अस्थ्नि-अस्थनि । एवं दधिसक्थ्यक्षिशब्दाः । दध्ना दधिभ्यां दधिभिः । सक्थि सक्थिनी सक्थीनि । २ । सक्थ्ना सक्थिभ्यां सक्थिभिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अचया अच्चिभ्यां अच्चिभिः। अच्चणे इत्यादि पूर्ववत्प्रक्रिया ॥ १३ ॥

नपुंसकस्य ह्रस्वः ॥ १४ ॥

नपुंसकस्य ह्रस्वो भवति। नपुंसकात् स्यमोर्लुक्। ग्रामणि नाम्निनः स्वरे। इमौ ग्रामणिनी ग्रामणीनि। नाम्निनः स्वरे। नोपधायाः इति दीर्घः ॥ १४ ॥

टादावुक्तपुंस्कं पुंवद्वा ॥ १५ ॥

उक्तपुंस्कं नाम्यन्तं नपुंसकलिङ्गं टादौ स्वरे परे पुंवद्वा भवति। नाम्निनः स्वरे। ग्रामणिना ग्रामण्या ग्रामणिभ्यां ग्रामणिभिः। ग्रामण्ये-ग्रामणिने ग्रामणिभ्यां ग्रामणिभ्यः। ग्रामण्यः-ग्रामणिनः ग्रामणिभ्यां ग्रामणिभ्यः। ग्रामण्यः-ग्रामणिनः ग्रामण्योः-ग्रामणिनोः ग्रामण्याम्। नुमन्तस्यामि दीर्घो नाम्निनः स्वरे। ग्रामणीनाम्। आम् ङेः। ग्रामण्यां-ग्रामणिनि ग्रामण्योः-ग्रामणिनोः ग्रामणिषु। हे ग्रामणि हे ग्रामणिनी हे ग्रामणीनि। अतोऽम्। सोमपं सोमपे सोमपानि ॥ २ ॥ सोमपेन सोमपाभ्यां सोमपैः। सोमपाय सोमपाभ्यां सोमपेभ्यः इति। पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उकारान्तो मधुशब्दः । नपुंसकात्स्यमोर्लुक् । मधु । नामिनः स्वरे इति नुमागमः । मधुनी । जश्शसोः शिः । नोपधाया इति दीर्घः । मधूनि । पुनरपि मधु मधुनी मधूनि । नामिनः स्वरे । मधुना मधुभ्यां मधुभिः । ऋकारान्तः कर्तृशब्दः । नपुंसकात् स्यमोर्लुक् । कर्तृ । नामिनः स्वरे । इमौषु नीं णोऽनन्ते । कर्तृणी कर्तॄणी २ । ऋरम् । कर्त्रा कर्तृणा कर्तृभ्यां कर्तृभिः । कर्त्रे कर्तृणे कर्तृभ्यां कर्तृभ्यः । ऋतो ङ उः । स च ङित् । ङिति टेः । कर्तुः-कर्तृणः कर्तृभ्यां कर्तृभ्यः । कर्तुः-कर्तृणः कर्त्रोः-कर्तृणोः कर्तॄणाम् । कर्तृषु । हे कर्तृ हे कर्तृणी हे कर्तॄणि । ऐकारान्तः अतिरैशब्दः । रायमतिक्रान्तमतिरि कुलम् । नावमतिक्रान्तमतिनु जलम् । उकारांत उपगुशब्दः । उगता गावो यस्येति तदुपगु ॥ १५ ॥

इति स्वरान्ता नपुंसकलिङ्गाः ॥ ८ ॥

अथहसान्ताः पुल्लिङ्गाः प्रदर्श्यन्ते ॥

तत्र हकारान्तः पुल्लिङ्गोऽनडुह्शब्दः । नामसंज्ञायां स्यादयः ।

पञ्चस्वनडुह आसागमो वक्तव्यः ॥ * ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सावनडुहः ॥ १ ॥

अनडुहशब्दस्य सौ परे नुमागमो भवति ॥ १ ॥

संयोगान्तस्य लोपः ॥ २ ॥

संयोगान्तस्य लोपो भवति रसे पदान्ते च । रेफादुत्तरस्य सकारस्यैव लोपो नान्यस्य ॥ २ ॥

हसे पस्सेर्लोपः ॥ ३ ॥

हसान्तादीवन्ताच्च परस्य सेर्लोपो भवति । उवम् इति वत्वम् । लोपविधिसामर्थ्यान्न दत्वम् । अनड्वान् अनड्वाहौ अनड्वाहः । अनड्वाहं अनड्वाहौ अनडुहः । अनडुहा अनडुद्भ्यां अनडुद्भिः॥३॥

वसां रसे ॥ ४ ॥

वसु स्रंसु ध्वंसु भ्रंसु अनडुह् इत्येतेषां रसे पदान्ते च दत्वं भवति । अनडुहे अनडुद्भ्यां अनडुद्भ्यः । अनडुहः अनडुहोः अनडुहाम् । अनडुहि अनडुहोः अनडुत्सु ॥ ४ ॥

स्वसे चपा झसानाम् धावम् ॥ ५ ॥

अनडुह्शब्दस्य धौ परे अमागमो भवति । सावनडुहः । उवम् । स्वरहीनं परेण संयोज्यम् । हे

अनड्वन् हेअनड्वाहौ हे अनड्वाहः इत्यादि। गो-दुह्शब्दस्य भेदः ॥ ५ ॥

दादेर्घः ॥ ६ ॥

दादेर्धातोर्हकारस्य घत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च। गोदुघ् सि इति स्थिते॥६॥

झध्वोः ॥ ७ ॥

धातोर्झभान्तस्यादौ वर्तमानानां जबानां झभा भवन्ति सकारे ध्वशब्दे च परे नाम्नश्च रसे पदा-न्ते च ॥ ७ ॥

वावसाने ॥ ८ ॥

अवसाने वर्तमानानां झसानां जबा भवन्ति च-पा वा। गोधुक्-गोधुग् गोदुहौ गोदुहः। गोदुहं गोदुहौ गोदुहः। गोदुहा। भकारादौ दादेर्घ इ-ति घत्वे आदिजबस्य दकारस्य झभे धकारे च कृते झभे जबाः। गोधुग्भ्यां गोधुग्भिः खसे च-पा झसानाम्। किलात् षः सः कृतस्येति षत्व-म्। क्षसंयोगे क्षः। गोधुक्षु हे गोधुक् हेगोधुग् हे गोदुहौ हे गोदुहः ॥ ८ ॥

मधुलिह्शब्दस्य विशेषः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

होढः ॥ ९ ॥

धातोर्हकारस्य ढत्वं भवति धातोर्झसे परे नाम्नस्य रसे पदान्ते च । वावसाने। मधुलिट् मधुलिड् मधुलिहौ मधुलिहः । हे मधुलिट् हे मधुलिड् हे मधुलिहौ हे मधुलिहः । मधुलिहं मधुलिहौ मधुलिहः। मधुलिहा मधुलिड्भ्यां मधुलिड्भिः ॥ ९ ॥

तुरासाह्शब्दस्य भेदः ॥

सहेः षः साढि ॥ १० ॥

साढिरूपे सति सहेर्धातोस्सकारस्य षकारादेशो भवति । तुराषाट्-तुराषाड् इत्यादि ॥ १० ॥

द्रुहादीनां घत्वढत्वे वा ॥ ११ ॥

द्रुहादीनां धातूनां घत्वढत्वे वा भवतः रसे पदान्ते च । मित्रध्रुक् मित्रध्रुग्-मित्रध्रुट् मित्रध्रुड् मित्रद्रुहौ मित्रद्रुहः । मित्रद्रुहं मित्रद्रुहौ मित्रद्रुहः । मित्रद्रुहा । झवे जवाः । मित्रध्रुग्भ्यां मित्रध्रुड्भ्यां इत्यादि।एवं तत्त्वमुहस्नुहशब्दौ॥ ११॥

रेफान्तश्चतुर्शब्दो नित्यं बहुवचनान्तः ॥

चतुराम् शौ च ॥ १२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुरशब्दस्यामागमो भवति पञ्चसु परेषु शौ च। चत्वारः चतुरः चतुर्भिः चतुर्भ्यः ॥ १२ ॥

रः संख्यायाः ॥ १३ ॥

रेफान्तसंख्यायाः परस्यामो नुडागमो भवति । णत्वं द्वित्वम् । चतुर्णाम् चतुर्षु ॥ १३ ॥

नकारान्तो राजन्शब्दः । नोपधाया इति पञ्चसु दीर्घः ॥

नाम्नो लोपशधौ ॥ १४ ॥

नाम्नो नकारस्यानागमनस्य लोपश् भवति रसे पदान्ते चाधौ । राजा राजानौ राजानः । राजानं राजानौ । अल्लोपः स्वरेऽस्वयुक्तात्कसादौ । स्तोश्चुभिश्चुरिति चुत्वेन ञकारः ॥ १४ ॥

जञोर्ज्ञः ॥ १५ ॥

जकारञकारयोर्योगे ज्ञो भवति । राज्ञः राज्ञा । राज्ञे राजभ्यां राजभ्यः । वेङ्यौ । राज्ञि-राजनि राज्ञोः राजसु इत्यादि । एवं यज्वन्आत्मन्स्वधर्मन्प्रभृतयः । अस्वयुक्तादिति विशेषणादल्लोपो नास्ति । यज्वनः यज्वना इत्यादि । श्वन्युवन्मघवन्शब्दानां पञ्चसु राजन्शब्दवत् प्रक्रिया ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वसादौ तु विशेषः ॥ १५ ॥

श्वादेर्वे उः ॥ १६ ॥

श्वादेर्वकारस्य उत्वं भवति श्वसादौ स्वरे परे तद्धिते ईपि ङ्कारे च । शुनः । शुना श्वभ्यां श्वभिरित्यादि । युवन्शब्दस्य वकारस्योत्वे कृते । सवर्णे दीर्घः सह । यूनः । यूना युवभ्यां युवभिरित्यादि । पथिन्शब्दस्य भेदः ॥ १६ ॥

इतोऽत्पञ्चसु ॥ १७ ॥

पथ्यादीनामिकारस्याकारादेशो भवति पञ्चसु परेषु ॥ १७ ॥

थो न्तुट् ॥ १८ ॥

पथ्यादीनां थकारस्य नुडागमो भवति पञ्चसु स्यादिषु परेषु पंथन् सि इति स्थिते ॥ १८ ॥

आ सौ ॥ १९ ॥

पथ्यादीनां टेरात्वं भवति सौ परे। पन्थाः पन्थानौ पन्थानः । आत्वविधानान्न सेर्लोपः । हे पन्थाः । पन्थानं पन्थानौ ॥ १९ ॥

पथां टेः ॥ २० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पथ्यादीनां टलोपो भवति असादौ स्वरे परे। यथा पथिभ्यां पथिभिरित्यादि। एवं मथिन्ऋभुक्षिन्शब्दौ। दण्डिन्शब्दस्य भेदः॥ २०॥

इन्हां शौ सौ॥ २१॥

इन् हन् पूषन् अर्यमन् इत्येषां शौ सौ चाधौ परे उपधाया दीर्घो भवति दण्डी दण्डिनौ दण्डिनः। हे दण्डिन्। दण्डिनं दण्डिनौ दण्डिनः। दण्डिना दण्डिभ्यां दण्डिभिः। इत्यादि ब्रह्महा ब्रह्महणौ ब्रह्महणः। हे ब्रह्महन् हे ब्रह्महणौ हे ब्रह्महणः। ब्रह्महणं ब्रह्महणौ। असादौ अकारलोपः॥ २१॥

हनो घ्ने॥ २२॥

हन्तेर्धातोर्हकारस्य घकारो भवति नकारे ञिणति च परे। घसंयोगो णत्वनिषेधार्थः। ब्रह्मघ्नः। ब्रह्मघ्ना ब्रह्महभ्यां ब्रह्महभिः इत्यादि। पूषा पूषणौ पूषणः। हे पूषन् हे पूषणौ हे पूषणः। पूषणं पूषणौ॥ २२॥

षणो ष्णः॥ २३॥

षकारणकारसंयोगे ष्णो भवति असादौ स्वरे प-

रे। पूषन्शब्दस्य शसादौ स्वरे परे वा टेर्लोपः। पूष्णः। पूष्णा पूषभ्यां पूषभिः। पूष्णे। ङौ टिलोपो वेति केचित्। पूष्णि-पूषणि पूष्णोः पूषसु। अर्यम्णः। अर्यम्णो अर्यमभ्यां इत्यादि। संख्याशब्दाः पञ्चन्प्रभृतयो बहुवचनान्तास्त्रिषु सरूपाः। पञ्चन् जस् इति स्थिते॥ २३॥

जस्शसोर्लुक्॥ २४॥

षकारनकारान्तसंख्यायाः परयोर्जश्शसोर्लुक् भवति। प्रत्ययलोपे प्रत्ययलक्षणम्। लुकि न तन्निमित्तम्। पञ्च पञ्च पञ्चभिः पञ्चभ्यः॥ २४॥

ष्णः॥ २५॥

षकारनकारान्तसंख्यायाः परस्यामो नुडागमो भवति। नोपधाया इति दीर्घः। नाम्नो नो लोपशधौ। पञ्चानां पञ्चसु। एवं सप्तन्नवन्दशन्प्रभृतयः॥ २५॥

अष्टनो वा डौ॥ २६॥

अष्टन्शब्दात्परयोर्जश्शसोर्वा डौ भवति डित्त्वात् टिलोपः। अष्टौ-अष्ट अष्टौ अष्ट॥ २६॥

वासु वा आ आसु॥ २७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टन आसु परासु विभक्तिषु वा आत्वं भवति । अष्टभिः अष्टभ्यः अष्टाभ्यः । २ । अष्टानाम् अष्टसु-अष्टासु ॥ मकारान्त इदंशब्दः ॥ २७ ॥

इदमोऽयं पुंसि ॥ २८ ॥

इदंशब्दस्य पुंसि विषये अयमादेशो भवति सिसहितस्य । अयम् । द्विवचनादौ त्यदादेष्टेरः स्यादावित्यकारः । इद ओ इति स्थिते ॥ २८ ॥

दस्य मः ॥ २९ ॥

त्यदादीनां दकारस्य मत्वं भवति स्यादौ परे । इमौ इमे । सर्वादित्वाज्जसि त्यदादीनां घेरभावः । इमं इमौ इमान् ॥ २९ ॥

अन् टौसोः ॥ ३० ॥

इदमोऽनादेशो भवति टौसोः परयोः । अनेन॥३०॥

स्भ्यः ॥ ३१ ॥

इदमः सकारे भकारे च परे अकारो भवति ककारस्य । अङ्गीत्यात्वम् । आभ्याम ॥ ३१ ॥

भिस् भिस् ॥ ३२ ॥

इदमदसोर्भिस् भिसेव भवति । न भकारस्याका·

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रः । एस्भि बहुत्वे । एभिः । अस्मै आभ्यां एभ्यः। अस्मात् आभ्यां एभ्यः । अस्य अनयोः एषाम् । अस्मिन् अनयोः एषु । किम्शब्दस्य त्यदादेष्टेरः स्यादाविति सर्वत्राकारे कृते सर्वशब्दवद्रूपम् । कः कौ के । कं कौ कान् इत्यादि । धकारान्तस्तत्त्वबुध्शब्दः । तस्य रसे पदान्ते चादिजबानामिति भकारः । वावसाने । तत्त्वभुत्-तत्त्वभुद् तत्त्वबुधौ तत्त्वबुधः । हे तत्त्वभुत् हे तत्त्वभुद् । तत्त्वबुधं तत्त्वबुधौ तत्त्वबुधः । तत्त्वबुधा तत्त्वभुद्भ्यां तत्त्वभुद्भिः इत्यादि ॥३२॥

छशषराजादेः षः ॥ ३३ ॥

छकारान्तस्य षकारान्तस्य च राज्यज्मृज्भ्रज्-भ्राजादेश्च षकारो भवति । धातोर्झसे परे रसे पदान्ते च ॥ ३३ ॥

षो डः ॥ ३४ ॥

षकारस्य डत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च । वावसाने । टकारो डकारस्य । सम्राट्सम्राड् सम्राजौ सम्राजः । सम्राजं सम्राजौ सम्राजः । सम्राजा सम्राड्भ्यां सम्राड्भिः इत्यादि । एवं विराजादयः । दकारान्तास्त्यद्-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद्यद्एतद्शब्दास्तेषां त्यदादेष्टरः स्यादाविति सर्वं नाङ्गादि क्रृते सर्वशब्दवद्रूपं ज्ञेयम् ॥ ३४ ॥

त्तः ॥ ३५ ॥

त्यदादेस्तकारस्य सौ परे सत्वं भवति । स्यः त्यौ त्ये । त्यं त्यौ त्यान् । सः तौ ते । तं तौ तान् । यः यौ ये । यं यौ यान् । एषः एतौ एते ।

एतदोऽन्वादेशे द्वितीयाटौस्स्वेनो वा वक्तव्यः ॥ ❋ ॥

उक्तस्य पुनरुक्तावन्वादेशः । यथानेन बालेन व्याकरणमधीतं एनं छन्दोऽध्यापय । एतं एनं एतौ-एनौ एतान्-एनान् । एतेन एनेन एताभ्यां एतैः । एतयोः-एनयोः एतेषाम् । एतस्मिन् एतयोः-एनयोः एतेषु । छकारान्तस्तत्त्वप्राक्छब्दः । तत्त्वप्राट्तत्त्वप्राड् तत्त्वप्राछौ तत्त्वप्राछः इत्यादि ॥ ३५ ॥

थकारान्तो ऽग्निमथ्शब्दः । तस्य वावसाने । चपा जवाश्च । अग्निमत्-अग्निमद् अग्निमथौ अग्निमथः इत्यादि । चकारान्तः प्रत्यच्शब्दः ।

नो लोपः ॥ ३६ ॥

धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपो भवति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अञ्चः पञ्चसु नुः वक्तव्यः ॥ * ॥
प्रत्यन् च् इति स्थिते स्तोः श्चुरिति चुत्वेन ञ कारः । संयोगान्तस्य लोपः ॥ ३६ ॥

चोः कुः ॥ ३७ ॥

चवर्गस्य कवर्गादेशो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते यथासंख्येन । प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चं प्रत्यञ्चौ ॥ ३७ ॥

अञ्चेरल्लोपो दीर्घश्च ॥ ३८ ॥

अञ्चधातोरकारस्य लोपो भवति पूर्वस्य च दीर्घः शसादौ स्वरे तद्धिते ईपीकारे च । निमित्ताभावे नैमित्तिकस्याप्यभावः प्रतीचः । प्रतीचा प्रत्यग्भ्यां प्रत्यग्भिः प्रत्यक्षु । एवं तिर्यच्प्रभृतयः । तिर्यङ् तिर्यञ्चौ तिर्यञ्चः । तिर्यञ्चं तिर्यञ्चौ ॥ ३८ ॥

तिरश्चादयः ॥ ३९ ॥

तिरश्चादयो निपात्यन्ते शसादौ स्वरे परे तद्धिते ईपि ईकारे च । तिरश्चः । तिरश्चा तिर्यग्भ्यां तिर्यग्भिः । तिर्यक्षु । उदच्शब्दस्य उदीच इति निपात्यते शसादौ स्वरे परे । उदीचः उदीचा इत्यादि । एवमन्यच्चित् ॥ ३९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तकारान्त उकारानुबन्धो महच्छब्दः ॥

उगृतो नुम् ॥ ४० ॥

उकारानुबन्धस्य ऋकारानुबन्धस्य च नुमागमो भवति पुंसि पञ्चसु परेषु ॥ ४० ॥

न्सम्महतो धौ दीर्घः शौ च ॥ ४१ ॥

न्सन्तस्याप्शब्दस्य महच्छब्दस्य च उपधाया दीर्घो भवति पञ्चसु धिवर्जितेषु शौ च परे । महान् महान्तौ महान्तः । महान्तं महान्तौ महतः । महता महद्भ्यां महद्भिः इत्यादि । हे महन् ॥ ४१ ॥

उकारानुबन्धो भवच्छब्दः ॥

अत्वसोः सौ ॥ ४२ ॥

अत्वन्तस्यासन्तस्य च दीर्घो भवति धिवर्जितेषु सौ च परे । भवान् भवन्तौ भवन्तः इत्यादि । ऋकारानुबन्धस्य भवच्छब्दस्य नुमागम एव न दीर्घः । भवन् भवंतौ भवंतः इत्यादि । पठन् पठन्तौ पठन्तः । पठन्तं पठन्तौ । पचन् पचन्तौ पचन्तः इत्यादि । शकारान्तो विशशब्दः । छशष-राजादिना षत्वम् । षो डः । षकारस्य डत्वं च। वावसाने । चपा जबाश्च । विट्-विड् विशौ वि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शः इत्यादि । षकारान्तः षष्शब्दो नित्यं बहुवचनान्तस्त्रिषु सरूपः जश्शसोर्लुक् । षो डः । षट्-षड्-षड्भिः षड्भ्यः ॥ २ ॥ षणा इति नुडागमः । षड् नाम् इति स्थिते ॥ ४२ ॥

डणः ॥ ४३ ॥

संख्यासंबन्धिनो डकारस्य णत्वं भवति नामि परे । ण्टुभिण्टुः । षण्णां षट्सु । क्वचिदपदान्ते पदान्तताश्रयणीया ॥ ४३ ॥

दोषां रः ॥ ४४ ॥

दोष्सजुष्आशिष्हविष्प्रभृतीनां षकारस्य रेफो भवति रसी पदान्ते च । दोः दोषौ । दोषं दोषौ । दोष्शब्दस्य शसादौ स्वरे परे नान्तता वा वक्तव्या । दोषः दोष्णः-दोषा-दोष्णा दोर्भ्यां इत्यादि । सजूः सजुषौ सजुषः । सजुषा ॥

शिषो रसे पदान्ते च दीर्घो वक्तव्यः ॥ * ॥

सजूर्भ्यामित्यादि ॥ ४४ ॥

पुंसोऽसुङ् ॥ ४५ ॥

पुंस्शब्दस्य पञ्चसु परेषु असुङादेशो भवति । ङकारोन्त्यादेशार्थः ॥ ४५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वरे मः ॥ ४६ ॥

अनुस्वारस्य मकारो भवति। पुम् अस् इति स्थिते। उतो नुम्। न्सम्महतोऽधौ दीर्घः शौ च। संयोगान्तस्य लोपः। पुमान् पुमांसौ पुमांसः। पुमांसं पुमांसौ पुंसः। पुंसा पुंभ्यां पुंभिः। हे पुमन् ॥ ४६ ॥

असंभवे पुंसः कक् सौ ॥ ४७ ॥

वेदान्तैकवेद्यस्यात्मनो बहुत्वासंभवेऽर्थे वाच्ये सति पुंस्शब्दस्य सुपि परे कगागमो भवति॥४७॥

स्कोराद्योश्च संयोगाद्योः ॥ ४८ ॥

सकारककारयोर्लोपो भवति धातोर्झसि परे नान्तस्य रसि पदान्ते च। पुंक्षु। एवं विद्वस्शब्दः। विद्वान् विद्वांसौ विद्वांसः। हे विद्वन्। विद्वांसं विद्वांसौ ॥ ४८ ॥

वसोर्व उः ॥ ४९ ॥

वसोः संबन्धिनो वकारस्य उत्वं प्राप्नोति भसादौ स्वरे परे तद्धिते ङीपि ईकारे च। विदुषः। विदुषा वसां रसि। विद्वद्भ्यां विद्वद्भिः। विद्वत्सु इ-

त्यादि । सुवचस्शब्दस्य अत्वसोः सौ इति दीर्घः । सुवचाः सुवचसौ सुवचसः । हे सुवचः । सुवचसं सुवचसौ सुवचसः । सुवचसा सुवचोभ्यां सुवचोभिः । उशनसश्च स्वल्प भेदः ॥ ४९ ॥

उशनसाम् ॥ ५० ॥

उशनस् पुरुदंशस् अनेहस् इत्येतेषां सेरडा भवति । डकारष्टिलोपार्थः । उशना: उसनसौ । धौ सान्तता नान्तता अदन्तता वा वक्तव्या ॥ * ॥

हे उशनः-हे उशनन्-हे उशन । अदस्शब्दस्य विशेषः । त्यदादेष्टेरिति सर्वत्राकारः । अद सि इति स्थिते ॥ ५० ॥

सौ सः ॥ ५१ ॥

अदसो दकारस्य सौ परे सत्वं भवति ॥ ५१ ॥

सेरौ ॥ ५२ ॥

अदसः सेरौ भवति । असौ । द्विवचने अदस् औ इति स्थिते दस्य मः ॥ ५२ ॥

मादु ॥ ५३ ॥

उश्च ऊश्च उ अदसो मकारात्परस्य ऋवर्णस्य ऋ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्व उकारो भवति दीर्घस्य च दीर्घ ऊकारो भवति । अमू । बहुवचने सर्वादित्वाज्जसि अद ए । अम् ए इति स्थिते ॥ ५३ ॥

एरी बहुत्वे ॥ ५४ ॥

बहुत्वे सत्यदस एकारस्य ईकारो भवति । अमी । अमुं अमू अमून् । मत्वे नत्वे च कृते टानाख्यायाम् । अमुना द्विवचने आदीत्यात्वं पश्चादुकारः । अमूभ्याम् ॥ ५४ ॥

भिसभिस् ॥ ५५ ॥

इदमदसोर्भिस् भिसेव भवति न भकारस्याकारः । अमीभिः । अमुष्मै अमूभ्यां अमीभ्यः । अमुष्मात् अमूभ्यां अमीभ्यः । अमुष्य । ओसि एत्वे यंयादेशे च कृते पश्चादुकारः । अमुयोः अमीषाम् । अमुष्मिन् अमुयोः अमीषु ॥ ५५ ॥

सामान्ये अदसः कः स्यादिवच्च ॥ ५६ ॥

अमुकः अमुकौ अमुके ॥ ५६ ॥

इति हसान्ताः पुंलिङ्गाः ॥ ९ ॥

अथ हसान्ताः स्त्रीलिङ्गाः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्र हकारान्ता उपानह शब्दः ॥

नहो धः ॥ १ ॥

नहो हकारस्य धकारादेशो भवति रसे पदान्ते च वावसाने । धस्य दत्वम् । तत्वम् । उपानत्- उपानद् उपानहौ उपानहः । हे उपानत् । उ- पानहं उपानहौ उपानहः । उपानहा उपानद्भ्या उपानद्भिः इत्यादि ॥ १ ॥

वकारान्तो दिव्शः ॥

दिव औ ॥ २ ॥

दिवो वकारस्य औकारादेशो भवति सौ परे । द्यौः दिवौ दिवः । हे द्यौः ॥ २ ॥

वाऽमि ॥ ३ ॥

दिवो वकारस्य अमि परे वा धात्वं भवति। द्यां- दिवं दिवौ दिवः । दिवा ॥ ३ ॥

उरसे ॥ ४ ॥

दिवो वकारस्य रसे परे उकारो भवति । द्युभ्यां द्युभिः द्युषु इत्यादि ॥ ४ ॥

रेफान्तश्चतुर्शब्दो नित्यं बहुवचनान्तः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिचतुरोः स्त्रियां तिसृचतसृवत् ॥५॥

स्त्रियां वर्तमानयोः त्रिचतुर्शब्दयोः तिसृ चतसृ इत्येतावादेशौ भवतः विभक्तौ परतः। ऋकारश्च ऋकारवत्। ततस्तुरार् इत्यार् न भवति। तिस्रः. तिस्रः तिसृभिः तिसृभ्यः तिसृभ्यः ॥ ५ ॥

न तिसृ चतसृ छन्दसि ॥ ६ ॥

द्वयोरेतयोर्दीर्घो न भवति नामि परे। तिसृणाम्। छन्दसि तु भवति। तिसॄणां तिसृषु। एवं चतसृ ॥ ६ ॥

गिर्शब्दस्य भेदः ॥

व्योर्विहसे ॥ ७ ॥

धातोरिकारोकारयोर्दीर्घो भवति रेफवकारयोर्हसपरयोः पदान्ते च। गीः गिरौ गिरः। हे गीः। गिरं गिरौ गिरः। गिरा गीर्भ्यां गीर्भिः। गीर्षु। एवं धूः धुरौ धुरः। हे धूः। पूः पुरौ पुरः। हे पूः। पुरा पूर्भ्यां पूर्भिः। पूर्षु। धकारान्तः समिध्शब्दः। समित्-समिद् समिधौ समिधः हे समिद्-हे समित्। समिद्भ्यां समिद्भिः समित्सु। भकारान्तः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ककुभ् शब्दः । ककुप्-ककुब् ककुभौ ककुभः । हे ककुप्-हे ककुब् इत्यादि । दकारान्तास्त्यदादयस्तेषां त्यदादेष्टेरिति सर्वत्राकारः । आवतस्त्रियामित्याप् । स्या त्ये त्याः । सा ते ताः । या ये याः । एषा एते एताः । अन्वादेशे एतां-एनां एते-एने एताः-एनाः एवं किम् । का के काः ७॥

इयं स्त्रियाम् ॥ ८ ॥

इदम् शब्दस्य स्त्रियामियं भवति सौ परे सिसस्थितस्य । इयं इमे इमाः । इमां इमे इमाः । अनया आभ्यां आभिः । अस्यै आभ्यां आभ्यः इत्यादि । चकारान्तस्त्वच् शब्दः । चोः कुरिति कुत्वम् । त्वक् त्वग् त्वचौ त्वचः । त्वग्भ्यां त्वक्षु । हे त्वक् । एवं ऋच्वाच्प्रभृतयः । अप्शब्दो नित्यं बहुवचनान्तः । अप्जस् इति स्थिते । न्सम्महत इति दीर्घः । आपः । द्वितीयाबहुवचने पञ्चसु इति विशेषणात् न दीर्घः । अपः ॥ ८ ॥

भिद्पाम् ॥ ८ ॥

अवादीनां भकारे परे दत्वं भवति । अद्भिः अद्भ्यः अद्भ्यः अपां अप्सु ॥ ९ ॥

शकारान्तो दिश्शब्दः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिशां कः ॥ १० ॥

दिश् दृश् स्पृश् मृश् इत्यादीनां रसे पदान्ते च कत्वं भवति। दिक् दिग् दिशौ दिशः। हे दिक् हे दिग्। दिशं दिशौ दिशः। दिशा दिग्भ्यां दिग्भिरित्यादि। षकारान्तस्त्विष्शब्दः। षो ड इति डत्वम्। वावसाने टकारः। त्विट्-त्विड् त्विषौ त्विषः। हे त्विट्-हे त्विड् हे त्विषौ हे त्विषः।-त्विषं त्विषौ त्विषः। त्विषा त्विड्भ्यां त्विड्भिः इत्यादि। आशिष्शब्दस्य सजुष्शब्दवद्रूपं ज्ञेयम्। आशीः आशिषौ आशिषः। आशीर्भ्यां। आशीष्षु-आशीःषु। हे आशीः। स्त्रीलिङ्गस्यादस्शब्दस्य सौ न विशेषः। द्विवचनादौ टेरत्वे मत्वे च कृते अनन्तरमावतः स्त्रियामित्याप् दीर्घत्वं विभक्तिकार्यं पश्चान्मादू इति ह्रस्वस्य दीर्घस्य उकार ऊकारश्च। असौ अमू अमूः। अमुं अमू अमूः। अमुया अमूभ्यां अमूभिः। अमुष्यै अमूभ्यां अमूभ्यः। अमुष्याः अमूभ्यां अमूभ्यः। अमुष्याः अमुयोः अमूषाम्। अमुष्यां अमुयोः अमूषु ॥ १० ॥

इति हसान्ताः स्त्रीलिङ्गाः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ हसान्ता नपुंसकलिङ्गाः प्रदर्श्यन्ते ॥

रेफान्तो वार्शब्दः ।

नपुंसकात्स्यमोर्लुक् ॥१॥

वाः वारी वारि । २ । अयम इति विशेषणान्नुम् न भवति । वारा वार्भ्यां वार्भिः वारे इत्यादि । चतुर्शब्दे चतुराम्शौ चेत्याम् । चत्वारि चत्वारि चतुर्भिः चतुर्भ्यः चतुर्भ्यः चतुर्णां चतुर्षु ॥ १ ॥

नकारान्तोऽहन्शब्दः ॥

अह्नः सः ॥ २ ॥

अहन्शब्दस्य नकारस्य सकारो भवति रसे पदान्ते च । स्रोर्विसर्गः । अहः । ईमौ वेङ्गोः । अह्नी अहनी अहानि । अह्ना अहोभ्यां अहोभिः । अह्ने अहोभ्यां अहोभ्यः । अह्नः अहोभ्यां अहोभ्यः। अह्नः अह्नोः आह्नाम् । अह्नि- अहनि अह्नोः अहस्सु ।

ब्रह्मन्शब्दस्य रसे पदान्ते च नस्य लोपो वक्तव्यः ॥ * ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्म ब्राह्मणी ब्रह्माणि । पुनः ब्रह्म ब्रह्मणी ब्रह्माणि । ब्रह्मणा ब्रह्मभ्यां ब्रह्मभिः इत्यादि ॥

सम्बोधने धौ न पुंसके न लोपो वा वक्तव्यः ॥ * ॥

हे ब्रह्म हे ब्रह्मन् । एवं चर्मन्वर्मन्शर्मन्कर्मन् व्योमन्दामन्नामन्प्रभृतयः ।

नान्तादन्ताच्छन्दसि ङिश्योर्लोपो वक्तव्यः ॥ * ॥

छन्दस्यागमजानागमजयोर्लोपालोपौ च वक्तव्यौ ॥ * ॥

परमे व्योमन् सर्वा भूतानि । त्यादादीनां स्यमोर्लुकि कृते टेरत्वं न भवति । स्यादाविति विशेषणाद्विवचनादौ टेरत्वे कृते सर्वशब्दवद्रूपं ज्ञेयम् । त्यत् त्ये त्यानि । पुनः । त्यत् त्ये त्यानि । त्येन त्याभ्यां त्यैरित्यादि । एवं तत् ते तानि २ यत् ये यानि । २ । एतत् एते एतानि । २ । किं के कानि । २ । इदम् इमे इमानि । २ । तृतीयादौ सर्वत्र पुंवत् ॥

चकारान्तः प्रत्यच्शब्दः ।

प्रत्यक् प्रत्यग् । अच्चेरलोपो दीर्घश्च । प्रतीची । नुमयमः प्रत्यञ्चि ॥

तकारान्तो जगत्शब्दः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जगत् जगती जगन्ति। पुनः। २। जगता जगद्भ्यां जगद्भिरित्यादि। महच्छब्दे तु नुसम्महत इति सिविषये दीर्घो न। महत् महती महान्ति। २। इत्यादि। षकारान्तो हविष्शब्दः सजुष् च। हविः हविषी हवींषि। २। इत्यादि। सजूः सजुषी सजूंषि। २। एवं सकारान्ताः पयस्तेजस्वर्चस्प्रभृतयः।। पयः पयसी पयांसि २ पयसा पयोभ्यामित्यादि। अदस्शब्दस्य मोलुंकि कृते स्तोर्विसर्गः। द्विवचनादौ टेरत्वे कृते मत्वोत्वे। अदः अमुनी अमूनि। पुनः। २। अमुना अमूभ्यां अमीभिः। अमुष्मै अमूभ्यां अमीभ्यः। अमुष्मात् अमूभ्यां अमीभ्यः। अमुष्य अमुयोः अमीषाम्। अमुष्मिन् अमुयोः अमीषु॥२॥

+०+

इति हसान्ता नपुंसकलिङ्गाः।

अथ युष्मदस्मदोः स्वरूपं निरूप्यते। तयोश्च वाच्यलिङ्गत्वात्त्रिष्वपि लिङ्गेषु समानं रूपम्।

त्वमहं सिना॥ १॥

युष्मदस्मदोः सिसहितयोस्त्वमहमित्येतावादेशौ भवतः यथासंख्येन। त्वं अहम्॥ १॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

युववौ द्विवचने ॥ २ ॥

युष्मदस्मदोर्द्विवचने युवाव इत्येतावादेशौ भवतः ॥ २ ॥

आमौ ॥ ३ ॥

युष्मदस्मदोः पर औ आम् भवति । युवां आवाम् ॥ ३ ॥

यूयं वयं जसा ॥ ४ ॥

जसा सहितयोर्युष्मदस्मदोर्यूयं वयं इत्येतावादेशौ भवतः । यूयं वयम् ॥ ४ ॥

त्वन्मदेकत्वे युष्मदस्मदोः ॥ ५ ॥

त्वत् मत् इत्येतावादेशौ भवतः एकत्वे गम्यमाने । एकत्वं नाम एकार्थवाचित्वं न त्वेकवचनं तेन त्वत्पुत्रो मत्पुत्र इत्यादौ त्वन्मदादेशौ भवत एव ॥ ५ ॥

आमभ्यौ ॥ ६ ॥

युष्मदस्मदोष्टे रात्वं भवति अमि सकारे भिसि च परे । त्वां मां युवां आवाम् । त्यदादेष्टे रत्वे क्ल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ते शसीति दीर्घत्वम् ।

शसे नोवक्तव्यः ॥ * ॥

युष्मान् अस्मान् । त्वन्मदाशेषंकृते ॥ ६ ॥

ए टाङ्योः ॥ ७ ॥

युष्मदस्मदोष्टेरेत्वं भवति टा ङि इत्येतयोः परयोः । अयादेशः । त्वया मया युवाभ्यां आवाभ्यां युष्माभिः अस्माभिः ॥ ७ ॥

तुभ्यं मह्यं ङया ॥ ८ ॥

ङेसहितयोर्युष्मदस्मदोस्तुभ्यं मह्यमित्येतावादेशौ भवतः । तुभ्यं मह्यम् युवाभ्यां आवाभ्याम् ८

भ्यसश्भ्यम् ॥ ९ ॥

युष्मदस्मद्भ्यां परो भ्यस् शभ्यं भवति । शकारो भकारादित्वव्यावृत्त्यर्थः । तेनात्वौत्वे न भवतः । युष्मभ्यं अस्मभ्यम् ॥ ९ ॥

ङसिभ्यसोः शतुः ॥ १० ॥

पञ्चम्या ङसिभ्यसोः शतुर्भवति । शकारः सर्वादेशार्थः । त्वत् मत् युवाभ्या आवाभ्यां युष्मत् अस्मत् ॥ १० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तव मम ङसा ॥ ११ ॥

ङसा सहितयोर्युष्मदोस्तव मम इत्येतावादेशौ भवतः । तव मम युवयोः आवयोः । सर्वादित्वात्सुट् ॥ ११ ॥

सामाकाम् ॥ १२ ॥

युष्मदस्मद्भ्यां परः साम् आकम् भवति । युष्माकम् अस्माकम् । त्वयि मयि युवयोः आवयोः युष्मासु अस्मासु । अथानयोरादेशविशेषविधिः प्रदर्श्यते ॥ १२ ॥

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमे वान्नौ वस्नसौ ॥ १३ ॥

तत्रैकवचनेन सह ते मे भवतः द्विवचनेन सह वां नौ बहुवचने सह वस्नसौ ॥ १३ ॥

स्वामी ते स समायातः स्वामी मे सांप्रतं गतः । नमस्ते भगवन् भूयो देहि मे मोक्षमव्ययम् ॥ १ ॥ स्वामी वां स जहासोच्चैर्दृष्ट्वा नौ दामयाचनाम् । राजा वां दास्यते दानं ज्ञानं नौ मधुसूदनः ॥ २ ॥ देवो वामवताद्विष्णुर्नरकान्नौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जनार्दनः। स्वामी वो बलवान् राजा स्वामी नोऽसौ जनार्दनः॥ ३॥ नमो वो ब्रह्मविद्भ्यो ज्ञानं नो दीयतां धनम्। सानन्दान्वः प्रपश्यामः पश्यामो नः सुदुःखिनः॥ ४॥

त्वा मामा॥ १४॥

अमा सहितयोर्युष्मदस्मदोस्त्वा मा आदेशौ भवतः। पश्यामि त्वा मदालीढं पश्य मा मदभेदकम्। पश्यामि त्वा जगत्पूज्यं पश्य मा जगतां पते॥ १४॥

नादौ॥ १५॥

पादादौ वर्तमानयोर्युष्मदस्मदोर्नैते आदेशा भवन्ति। रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता। स एव नाथो भगवानस्माकं पापनाशनः। पादादाविति किम्। पान्तु वो नरसिंहस्य नखलाङ्गलकोटयः। हिरण्यकशिपोर्वक्षः क्षेत्रासृक्कर्दमारुणाः॥ १५॥

चादिभिश्च॥ १६॥

चादिभिरपि योगे नैते आदेशा भवन्ति। तव चायं प्रभुर्विष्णुर्मम चायं तथैव च। तव ये भक्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वो राजन् मम तेऽप्यतिप्रचव: ॥ १६ ॥

चादिर्निपातः॥ १७॥

चादिर्गणो निपातसंज्ञको भवति । च वा ह अ- ह एव एवं नूनं पृथक् विना नाना स्वस्ति अस्ति दोषा मृषा मिथ्या मिथस् अथ अथो ह्यस् श्वस् उच्चैस् नीचैस् शनैस् स्वर् अन्तर् प्रातर् पुनर् भूयस् आहोस्वित् उत् सह ऋते अन्तरेण अ- न्तरा नमस् अलम् कृतम् । अमानोना प्रतिषेधे। ईषत् किल खलु वै आरात् भृशं यत् तत् स्व- राश्च इत्येवम् । चादिर्गणो निपातसंज्ञो भवति। तच्चादिर्गणो विभक्त्यर्थे निपात्यते । तस्मिन्निति तत्र । यस्मिन्निति यत्र । कस्मिन्निति कुत्र क्व कु- ह । अस्मिन्निति अत्र । कस्मिन् काले कदा । तस्मिन् काले तदा । यस्मिन् काले यदा । सर्व- स्मिन्काले सर्वदा । एकदा । तेन प्रकारेण तथा। एवं यथाकथम् । अनेन प्रकारेण इत्थम् । त- स्मादिति ततः । एवं कुतः अतः इतः । सार्ववि- भक्तिकस्तसिरित्येके । पूर्वस्मिन्निति पुरस्तात् । परस्मिन्निति परेण । आद्दि च दूरे । दक्षिणाद्दि वसन्ति चाण्डालाः । किमः सामान्ये चिदादिः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कश्चित् कश्चन क्वचन । तदधीनकार्त्स्न्ययोर्वा सात् । राजाधीनं राजसात् । सर्वं भस्म करोति इति भस्मसात् । ऊर्युररयंगीकरणे । उरीकृत्य ऊरीकृत्य । सद्यादिः काले निपात्यते । सद्यः श्वः सपदि अधुना सांप्रतं शीघ्रं झटिति पूर्वेद्युः अन्येद्युः परेद्युः उभयेद्युः । यर्हि तर्हि काले ॥ १७॥

प्रादिरुपसर्गः ॥ १८ ॥

प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप अन्तर् आविर् । अयं गण उपसर्गसंज्ञकः ॥ १८ ॥

प्राग्धातोः ॥ १९ ॥

उपसर्गा धातोः प्राक् प्रयोक्तव्याः ॥ १९ ॥

तदव्ययम् ॥ २० ॥

तदिदं चादिरूपमव्ययसंज्ञं भवति ॥ २० ॥

क्त्वाद्यन्तं च ॥ २१ ॥

क्त्वा ल्यप् तुम् नम् च्वि डा धा वतु आम् कृत्वस् शस् ॥ २१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अव्ययाद्विभक्तेर्लुक् ॥ २२ ॥

अव्ययात्परस्य विभक्तेर्लुग्भवति न तु शब्दनिर्देशे। अव्ययानां न च लिङ्गादिनियमः ॥ उक्तं हि ॥ सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु॥ वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ उक्तान्यव्ययान्यलिङ्गानि ॥ २२ ॥

॥ इत्यव्ययानि ॥

अधुना लिङ्गविशेषविजिज्ञापयिषया स्त्रीप्रत्ययाः प्रस्तूयन्ते ॥

आवतः स्त्रियाम् ॥ १ ॥

आकारान्तान्नाम्नः स्त्रियां वर्तमानादाप्प्रत्ययो भवति। जाया माया मेधा श्रद्धा धारा इत्यादि ॥ अजादेश्चाप् वक्तव्यः ॥ * ॥

अजा एडका कोकिला बाला वत्सा शूद्रा गणिका ॥ १ ॥

काप्यतः ॥ २ ॥

कापि परे पूर्वस्याकारस्य इकारो भवति। कारिका पाचिका पाटिका कालिका तालिका। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ॥ आपं चै-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व ह्रसान्तानां यथा वाचा निशा दिशा ॥ २ ॥
अवगाहः वगाहः अपिधानं पिधानम् ॥ २ ॥

ह्रस्वो वा स्त्रियाम् ॥ ३ ॥

क्वापि परे तरादौ च पूर्वस्य ह्रस्वो वा भवति । वेणिका वेणीका । नदिका नदीका । श्रेयसितरा श्रेयसीतरा । श्रेयसितमा श्रेयसीतमा । नौकादौ न भवति । वा ग्रहणादियं विवक्षानिश्चयेन । निपतन्त्यनेकेष्वर्थेष्विति निपातानामनेकार्थत्वात् ॥ ३ ॥

ऋन्नेभ्य ईप् ॥ ४ ॥

नकारान्तादृकारान्तादणन्ताच्च स्त्रियामीप्प्रत्ययो भवति । दण्डिनी दण्तिनी । कारिणी मालिनी।

ईपि राज्ञोऽलोपो वक्तव्यः ॥ * ॥

राज्ञी शुनी कर्त्री हर्त्री औपगवी ॥ ४ ॥

यस्य लोपः ॥ ५ ॥

इस्य अस्य यस्तस्य लोपो भवति स्वरे यकारे च परे ॥ ५ ॥

ऐत्रितः ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षकारटकारउकारऋकारानुबन्धात् स्त्रियामीप्-प्रत्ययो भवति । ष् वराकी ट् कुरुचरी उ गोमती ॥ ६ ॥

अप्प्रत्ययोकारान्नित्यम् ॥ ७ ॥

अप्प्रत्ययप्रत्ययसंबन्धिनोऽवर्णात्परस्य शतुर्नित्यं नुमीकारे ङीपि च परे । ऋ पचन्ती पठन्ती इत्यादि ॥ ७

नदादेः ॥ ८ ॥

नदादेर्गणात् स्त्रियामीप्प्रत्ययो भवति ॥ नदी गौरी गौतमी ॥ ८ ॥

इन्द्रादेरानीप् ॥ ९ ॥

इन्द्रादेर्गणादानीप्प्रत्ययो भवति । इन्द्राणी भवानी शर्वाणी ॥ ९ ॥

ईप् समहारे गुणश्च ॥ १० ॥

समाहारार्थे ईप् प्रत्ययो भवति गुणश्च । त्रयी पञ्चफली ॥ १० ॥

पुंयोगे च ॥ ११ ॥

अकारात्पुंयोगे ईप्प्रत्ययो भवति । शूद्रस्य स्त्री शूद्री गणकी ॥ ११ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जातेरयोपधात् ॥ १२ ॥

जातिवाचिनोऽयकारोपधादकारान्तात् स्त्रियामीप्प्रत्ययो भवति । मेषी सूकरी हंसी कुक्कुटी ब्राह्मणी । अयकारोपधादिति किम् । चटिया वैश्या ।

प्रथमवयोवाचिनोऽत ङीप् वक्तव्यः ॥ * ॥

कुमारी किशोरी कलभी । प्रथमग्रहणात्किम् । वृद्धा स्थविरा अद्ग्रहणात्किम् । शिशुः ॥ १२ ॥

स्वाङ्गाद्वा ॥ १३ ॥

स्वाङ्गवाचिनो वा स्त्रियामीप् प्रत्ययो भवति । सुमुखी मृगाक्षी तन्वङ्गी । वाग्रहणात् पद्मवदना कमलवदना इत्यादौ न भवति ।

क्तिदिकारादक्तेरीव् वा वक्तव्यः ॥ * ॥

अङ्गुलिः अङ्गुली धूलिः धूली आजिः आजी । अक्तेरिति विशेषणात् कृतिः भूतिः ॥ १३ ॥

ऐ च मन्वादेः ॥ १४ ॥

मन्वादेर्गणात् स्त्रियामीप् प्रत्ययो भवति ऐकारादेशश्च । मनायी । चकारान्मनोरी वा । मनायी-मनावी मनुः वृषाकपायी ॥ १४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पत्न्यादयः ॥ १५ ॥

पत्न्यादयो निपात्यन्ते ॥ पत्नी अन्तर्वत्नी सखी अशिश्वी अर्धजरती युवती । प्राची प्रतीची उदीची समीची । दारशब्दो नित्यं बहुवचनान्तः पुल्लिङ्गः । दाराः दारान् दारैः दारेभ्यः २ दाराणां दारेषु । हे दाराः ॥ १५ ॥

वोतो गुणात् ॥ १६ ॥

उकारान्ताद् गुणवाचिनो वा स्त्रियामीप् प्रत्ययो भवति । पट्वी-पटुः मृद्वी-मृदुः तन्वी तनुः ऋज्वी ऋजुः ॥ १६ ॥

उत ऊः ॥ १७ ॥

उकारान्तान्मनुष्यजातेः स्त्रियामूप्रत्ययो वा भवति । पङ्गूः-पङ्गुः वामोरूः-वामोरुः ॥ १७ ॥

यूनस्तिः ॥ १८ ॥

युवन् शब्दात् स्त्रियां तिप्रत्ययो भवति । युवतिः एभ्यो नामत्वात्स्यादयः । आवन्तादाप् । आप इति सिलोपः । ईवन्ताद्वसे परे सलोपः पूर्ववत्प्रक्रिया ॥ १८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ इति स्त्रीप्रत्ययाः

अथ विभक्त्यर्थों निरूप्यते ॥

लिङ्गार्थे प्रथमा ॥ १ ॥

धातुप्रत्ययातिरिक्तमर्थवच्छब्दरूपं लिङ्गं तस्यैवार्थे सन्मात्रे प्रथमा विभक्तिर्भवति लिङ्गादयोऽपि प्रथमायां इति केचित्। तत्सद्ब्रह्म ॥ १ ॥

अन्योक्ते प्रथमा ॥ २ ॥

रविरिव राजते राजा। रोषात्कुमारी रोरूयते। बोभुज्यते भुवं भूपालः। प्रागास्तां रामलक्ष्मणौ। यदा कर्ता प्रथमान्तः कर्मणि द्वितीया तदा॥ यदा कर्ता तृतीयान्तः कर्मणि प्रथमा तदा॥१॥ सन्ति सन्तः कियन्तः। कुमाराः शेरते स्वैरं रोरूयन्ते च नारकाः॥ जेगीयन्ते च गीतज्ञा मेत्रियन्ते रुजार्दिताः॥ २ ॥

आमन्त्रणे च ॥ ३ ॥

आमन्त्रणमाभिमुखीकरणं तस्मिन्नर्थे प्रथमा विभक्तिर्भवति ॥ मां समुद्धर गोविन्द प्रसीद परमेश्वर ॥ कुमारौ स्वैरमासाथां चमध्वं भो तप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्विनः ॥ ३ ॥

भोसः भोस् भगोस्
अघोस् ॥ ४ ॥

एते शब्दा निपात्यन्ते धिविषये । क्षमस्व भो दुराराध्य भगोस्तुभ्यं नमोऽस्तु ते ॥ अधीष्व भो महाप्राज्ञ घातयाघोस्त्वघं स्मर ॥ ४ ॥

॥ इति प्रथमा ॥

शेषाः कार्ये ॥ ५ ॥

कर्तृसाधनयोर्दानपात्रे विश्लेषावधौ संबन्धाधारभावयोः शेषा विभक्तयो द्वितीयाद्या एष्वर्थेषु भवन्ति ॥

कर्ता कर्म च करणं संप्रदानं तथैव च ॥ अपादानाधिकरणमित्याहुः कारकाणि षट् ॥ १ ॥ कार्ये कर्मकारके उत्पाद्ये आप्ये संस्कार्ये विकार्ये च द्वितीया विभक्तिर्भवति ।

कटं करोति कारुको रूपं पश्यति चाक्षुषः ॥ राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोमपाः ॥ १ ॥ अभिसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ॥ द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभितो ग्रामं नदी वहति । सर्वतो ग्रामं वनानि सन्ति धिग् देवदत्तम् । उपर्युपरि ग्रामं मेघाः पतन्ति । अधोऽधो ग्रामं शलभाः पतन्ति । अध्यधि ग्रामं मृगाश्चरन्ति । समयानिकषाहाप्रतियोगेऽपि । समया ग्रामम् । निकषा ग्रामम् । अनुग्रामम् ॥ ५ ॥

कालाध्वनोर्नैरन्तर्येऽपि ॥ ६ ॥

कालाध्वनोर्नैरन्तर्ये द्वितीया विभक्तिर्भवति । मासमधीते । क्रोशं पर्वतः । नैरन्तर्याऽभावे मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ॥ ६ ॥

॥ इति द्वितीया ॥

कर्तरि प्रधाने क्रियाश्रये साधने च ॥ ७ ॥

क्रियासिद्ध्युपकारके करणेऽर्थे तृतीया विभक्तिर्भवति ।

भिन्नः शरेण रामेणार्युरावणो लोकरावणः ॥ कराग्रेण विदीर्णोऽपि वानरैर्ज्ञाते पुनः ॥ ७ ॥

इति तृतीया ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दानपात्रे चतुर्थी ॥ ८ ॥

दानपात्रे संप्रदानकारके चतुर्थी। सम्यक् श्रेयोबुद्ध्या प्रदीयते तत्संप्रदानम्। ददाति दण्डं पुरुषो महीपतेर्न चातिभक्त्या न च दानकाम्यया॥ यद्दीयते दानतया सुपात्रे तत्संप्रदानं कथितं मुनीन्द्रैः ॥ १ ॥
वेदविदे गां ददाति । अन्यच्च राज्ञो दण्डं ददाति । रजकस्य वस्त्रं ददाति ॥ ८ ॥

॥ इति चतुर्थी ॥

विश्लेषाऽवधौ पञ्चमी ॥ ९ ॥

विश्लेषो विभागस्तत्र योऽवधिश्चलतयाऽचलतया वा विवक्षितस्तत्रापादाने पञ्चमी । धावतोऽश्वात्पतत् । भूभृतोऽवतरति गङ्गा ॥ ९ ॥

॥ इति पञ्चमी

सम्बन्धेषष्ठी ॥ १० ॥

सम्बन्धिनोर्मध्ये योऽप्रधानस्तत्र षष्ठी ॥ भेद्यभेदकयोः श्लिष्टः स सम्बन्धोऽन्य उच्यते ॥ द्विष्ठो यद्यतिसंम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥ १ ॥ एकक्रियातः परस्परापेक्षारूपः सम्बन्धः । राज्ञः स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरुषो ज्ञेयः पित्रोरितत्प्रपूजनम् ॥ गुरूणां वचनं पथ्यं कवीनां रसवद्वचः ॥ १० ॥

॥ इति षष्ठी ॥

आधारे सप्तमी ॥ ११ ॥

आधारोऽधिकरणम् तत् षड्विधम् । औपश्लेषिकं १ सामीप्यकं २ अभिव्यापकं ३ वैषयिकं ४ नैमित्तिकं ५ औपचारिकं ६ चेति ॥ कटे शेते शेते कुमारोऽसौ वटे गावः सुशेरते ॥ तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम् ॥ युद्धे सन्नह्यते धीरोऽङ्गुल्यग्रे करिणां शतम् ॥ ११ ॥

भावः क्रियालक्षणं तत्रापि सप्तमी ॥ १२ ॥

प्रसिद्धक्रियाया अप्रसिद्धक्रियाबोधनं भावः । वर्षति देवे चौर आयातः । पतत्यंशुमालिनि पतितोऽरातिः ॥

अथोपपदविभक्त्यर्थौ निरूप्यते ॥

विना सह नमस् कृते निर्धारणे स्वाम्यादिभिश्च । एतैरपि योगे द्वितीयाद्या विभक्तयो भवन्ति। विना पापं सर्वं फलति । विना वातं विना वर्षं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्युतः पतनं विना ॥ विनाहस्तिकृतं दोषं केनेमौ पतितौ द्रुमौ ॥ १ ॥ अन्तरेणाचिणी किं जीवितेन । अन्तरा त्वां मां हरिरित्यादिपदात् ग्राह्यम् १२

सहादियोगे तृतीया ॥ १३ ॥

सह सदृशं साकं सार्धं समं योगेऽपि तृतीया । सह शिष्येणागतो गुरुः । सदृशश्चैत्रो मैत्रेण । साकं नयनाभ्यां श्लक्ष्णा दन्ताः । सार्धं धनिभिर्धृतः साधुः । समं चन्द्रेणोदितो गुरुः ॥ १३ ॥

नमः स्वस्तिस्वाहास्वधालं वषड्योगे चतुर्थी ॥ १४ ॥

नमो नारायणाय । स्वस्ति राज्ञे । सोमाय स्वाहा । पितृभ्यः स्वधा । अलं मल्लो मल्लाय । वषडिन्द्राय ॥ १४ ॥

ऋते आदियोगे पञ्चमी ॥ १५ ॥

ऋते ज्ञानान्न मुक्तिः । अन्यो गृहाद्विहारः ॥१५

ऋते योगे द्वितीयापि ॥ १६ ॥

ज्ञानमृते ॥ १६ ॥

विनायोगेऽपि तृतीया ॥ १७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानेन विना ॥ १७ ॥

दिग्योगे पञ्चमी ॥ १८ ॥

पूर्वो ग्रीष्माद्वसन्तः ॥ १८

निर्धारणे षष्ठीसप्तम्यौ ॥ १९ ॥

निर्धारणं क्रियागुणजातिभिः समुदायात् पृथक्करणं तत्र षष्ठीसप्तम्यौ भवतः । क्रियापराणां भगवदाराधकः श्रेष्ठः क्रियापरेषु वा । गवां कृष्णा गौः संपन्नक्षीरा गोषु वा । एतेषां क्षत्रियः शूरतमः एतेषु वा ॥ १९ ॥

स्वाम्यादियोगे षष्ठीसप्तम्यौ भवतः ॥ २० ॥

गोषु स्वामी गवां स्वामी गवामधिपतिः गोष्वधिपतिः ॥ २० ॥

कर्तृकार्ययोरक्तादौ कृति षष्ठी॥ २१ ॥

कर्तरि कार्ये च षष्ठीविभक्तिर्भवति क्तादिवर्जिते कृदन्ते शब्दे प्रयुज्यमाने ॥ व्यासस्य कृतिः । भारतस्य श्रवणम् ॥ २१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्मरतौ च कार्ये ॥ २२ ॥

स्मरतौ धातौ प्रयुज्यमाने कर्मणि षष्ठी । मातुः स्मरति । मातरं स्मरति ॥

हेतौ तृतीया पञ्चमी च वक्तव्या ॥ * ॥

अनित्यः शब्दः कृतकत्वेन कृतकत्वाद्वा ॥ २२ ॥

भयहेतौ पञ्चमी ॥ २३ ॥

चौराद्बिभेति । व्याघ्रात्त्रसति । विद्युत्पाताच्चकितः ॥ २३ ॥

षष्ठी हेतुप्रयोगे ॥ २४ ॥

कस्य हेतोरियंकन्या । अन्यस्य हेतोर्वसति २४

इत्थंभाव तृतीया ॥ २५ ॥

शिष्यं पुत्रेण पश्यति । पश्यति संसारमसारेण । पुष्करिणीं नद्या पश्यति ॥ २५ ॥

येनाङ्गविकारः ॥ २६ ॥

येनाङ्गेन विकृतेनाङ्गिनोऽङ्गविकारो लक्ष्यते ततस्मादंगात्तृतीया विभक्तिर्भवति । देवदत्तोऽक्ष्णा काणः । पादेन खञ्जः । कर्णेन बधिरः । शिरसा खल्वाटः ॥ २६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जनिकर्तुः प्रकृतिः ॥ २७ ॥

जायमानस्य कार्यस्योपादानमपादानसंज्ञं भवति । तत्रापादाने पञ्चमी । यस्मात्प्रजाः प्रजायन्ते तद्ब्रह्मेति विदुर्बुधाः ॥ २७ ॥

आङादियोगे पञ्चमी ॥ २८ ॥

आपाटलिपुत्राद्वृष्टो देवः ॥ २८ ॥

तादर्थ्ये चतुर्थी ॥ २९ ॥

संयमाय श्रुतं धत्ते नरो धर्माय संयमम् ॥ धर्मं मोक्षाय मेधावी धनं दानाय मुक्तये ॥ २९ ॥

क्रुध्यादियोगे चतुर्थी ॥ ३० ॥

क्रूराय क्रुध्यति । मित्राय द्रुह्यति । गुणवते असूयति ॥

यब्लोपे पञ्चमी वक्तव्या ॥ * ॥

हर्म्यात्प्रेक्षते आसनात्प्रेक्षते ॥

निमित्तात्कर्मयोगे सप्तमी च वक्तव्या ॥ * ॥

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ॥ केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ ३० ॥

विषये च ॥ ३१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तर्के चतुरः ॥ ३१ ॥

षष्ठीसप्तम्यौ चानादरे ॥ ३२ ॥

बहूनां क्रोशतां गतश्चौरः । बहुष्वसाधुषु निवारयत्स्वपि स्वयमार्यो याति साधुमार्गेण । बहुषु साधुषु वसत्स्वपि स्वयमनार्यो यात्यसाधुमार्गेण । मातापित्रो रुदतोः प्रव्रजति पुत्रः ॥ ३२ ॥

अन्योक्ते प्रथमा ॥ ३३ ॥

यदिदं कार्यत्वादन्येनाख्यातेन कृता चोक्तं भवति तदा प्रथमा प्रयोक्तव्या । घटः क्रियते । पटः कार्यः ॥ ३३ ॥

छन्दसि स्यादिः सर्वत्र ॥ ३४ ॥

दध्ना जुहोति । पुनन्तु ब्रह्मणस्पतिः । व्रजतीर्विरेजः ॥ ३४ ॥

॥ इति विभक्त्यर्थप्रक्रिया समाप्ता ॥

अथार्थवद्विभक्तिविशिष्टानां पदानां समासो निरूप्यते ॥

समासश्चान्वये नाम्नाम् ॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाम्नामन्वययोग्यत्वे सत्येव समासो भवति। च शब्दात्तद्धितेऽपि भवति। ततो भार्या पुरुषस्येत्यादौ न भवति परस्परमसंवन्धात्॥

स च षड्विधः। अव्ययीभावस्तत्पुरुषो द्वंद्वो बहुव्रीहिः कर्मधारयो द्विगुश्चेति। तत्र पूर्वं पदप्रधानोऽव्ययीभावः। द्विगुतत्पुरुषौ परपदप्रधानौ। द्वन्द्वकर्मधारयौ चोभयपदप्रधानौ। बहुव्रीहिरन्यपदप्रधानः। तस्य क्रियाभिः संबन्धा। उभयपदप्रधानो बलवान्॥

ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्रयोजनम्। स्वियमधिकृत्य भवति विग्रहे। अन्वययोग्यार्थसमर्थकः पदसमुदायो विग्रहः वाक्यमिति यावत्। स्वपदैरन्यपदैर्वा विविच्य कथनं विग्रहः॥ १॥

कृते समासे अव्ययस्य पूर्वनिपातो वक्तव्यः॥*॥

पूर्वेऽव्ययीभावः॥ २॥

अव्यये पूर्वपदे सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासोभवति॥ २॥

इति समाससंज्ञायां सत्यास्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समासप्रत्यययोर्लुक् ॥ ३ ॥

समासे वर्तमानाया विभक्तेः प्रत्यये च परे लुग्भवति । इत्यसौ लुक् । निमित्ताभावे नैमित्तिकस्याप्यभावः । नामसंज्ञायां स्यादिर्विभक्तिः । अधि स्त्रि सि इति स्थिते ॥ ३ ॥

स नपुंसकम् ॥ ४ ॥

सोऽव्ययीभावो नपुंसकलिङ्गोभवति । नपुंसकत्वात् ह्रस्वत्वम् ॥ ४ ॥

अव्ययीभावात् ॥ ५ ॥

अव्ययीभावात्परस्या विभक्तेर्लुग्भवति । अधिस्त्रि गृहकार्यम् । रायमतिक्रान्तमतिरि कुलम् । नावमतिक्रान्तमतिनु जलम् ॥

ह्रस्वादेशे सन्ध्यक्षराणामिकारोकारौ च वक्तव्यौ ॥ * ॥

योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । रूपस्य योग्यं अनुरूपम् । पदर्थान् व्याप्तुमिच्छा वीप्सा । विष्णुं विष्णुं प्रति प्रतिविष्णु । सादृश्ये तु यथा हरिस्तथा हरः ॥ ५ ॥

यथाऽसादृश्ये ॥ ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथाशब्दोऽसादृश्ये वर्तमानः समस्यते । शक्तिम-नतिक्रम्य करोतीति यथाशक्ति ॥ ६ ॥

अतोऽमनतः ॥ ७ ॥

अकारान्तादव्ययीभावात्परस्य विभक्तेरम् भवति अतं वर्जयित्वा । कुम्भस्य समीपंउपकुम्भं वर्तते । उपकुम्भं पश्य उपकुम्भादानय । अनत इति विशेषणात्पञ्चम्या अम् न भवति ॥ ७ ॥

वा टाङ्योः ॥ ८ ॥

टा ङि प्रत्ययेतयोर्वा अम् भवति । उपकुम्भेन कृतं उपकुम्भकृतम् । उपकुम्भं निधेहि उपकुम्भे निधेहि ॥ ८ ॥

अवधारणार्थे यावति च ॥ ९ ॥

अवधारणार्थे यावच्छब्दे पूर्वपदे सति अव्ययीभावसंज्ञकः समासो भवति । यावन्त्यमत्राणि संभवन्ति तावतो ब्राह्मणान्निमन्त्रयस्वेति यावदमत्रम् । मक्षिकाणामभावो निर्मक्षिकं वर्तते ॥९॥

इत्यव्ययीभावः ।

अमादौ तत्पुरुषः ॥ १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयाद्यन्ते पूर्वपदे सति योऽन्वयः स तत्पुरुषसंज्ञकः समासो भवति । ग्रामं प्राप्तो ग्रामप्राप्तः । दात्रेण छिन्नं दात्रच्छिन्नम् । यूपाय दारु यूपदारु । वृकेभ्यो भयं वृकभयम् । राज्ञः पुरुषो राजपुरुषः । अक्षेषु शौण्डः अक्षशौण्डः । क्वचिदसाद्यन्तस्य परत्वम् । आहिताग्निः । पूर्वं भूतो भूतपूर्वः । समासे क्वचिदेकपद्यं णत्वहेतुः । शराणां वनं शरवणम् । आम्राणां वनं आम्रवणम् । पानस्य वा । सुरापानं सुरापाणम् ॥ १ ॥

नञि ॥ २ ॥

नञि पूर्वपदे सति योऽन्वयः स तत्पुरुषसंज्ञकः समासो भवति । न ब्राह्मणः अब्राह्मणः ॥ २ ॥

नाना ॥ ३ ॥

समासे सति नञोऽकारादेशो भवति ॥ ३ ॥

नाकादिवर्ज्यम् ॥ ४ ॥

नाकं नपुंसकम् ॥ ४ ॥

अनू स्वरे ॥ ५ ॥

समासे सति नञोऽनादेशो भवति स्वरे परे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अधर्मादन्योऽनधर्मः । धर्माद्विरुद्धोऽधर्मः ग्रहणाना-मभावोऽग्रहणमित्यादि । तदन्यत्तद्विरुद्धतदभावे-षु नञ् वर्तते ॥ ५ ॥

॥ इति तत्पुरुषः ॥

चार्थे द्वन्द्वः ॥ १ ॥

समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । त-त्रेश्वरं गुरुं च भजस्वेति प्रत्येकमेकक्रियाभिसं-बन्धे समुच्चये समासो नास्ति । बटो भिक्षामट गांचानयेति क्रमेण क्रियाद्वयसंबन्धे अन्वाचये च समासो नास्ति । परस्परमसंबन्धात् । इतरेतर-योगे समाहारे चार्थे द्वन्द्वः समासो भवति ।

द्वन्द्वेऽल्पस्वरप्रधाने इकारोकारान्तानां पूर्वनि-पातो वक्तव्यः ॥ * ॥

अग्निश्च मारुतश्च अग्निमारुतौ । पटुश्च गुप्तश्च प-टुगुप्तौ ॥ १ ॥

उक्तार्थानामप्रयोगः ॥ २ ॥

स्त्री च पुरुषश्च स्त्रीपुरुषौ । भोक्ता च भोग्यश्च भोक्तृभोग्यौ । धवश्च खदिरश्च धवखदिरौ ।

देवताद्वन्द्वे पूर्वपदस्य दीर्घो वक्तव्यः ॥ * ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्निश्च सोमश्च अग्नीषोमौ । इन्द्रश्च बृहस्पतिश्च इन्द्राबृहस्पती ।

अग्न्यादेः सोमादीनां षत्वं वक्तव्यम् ॥ * ॥

इतरेतरयोगे द्विवचनम् ।

एकवद्भावो वा समाहारे वक्तव्यः ॥ * ॥

शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशाः । तेषां समाहारे शशकुशपलाशम् ॥ २ ॥

स नपुंसकम् ॥ ३ ॥

यस्यैकवद्भावः स नपुंसकं भवति ।

अन्यादीनां विभक्तिलोपे कृते पूर्वस्य समागमो वक्तव्यः ॥ * ॥

अन्यश्च अन्यश्च अन्योन्यम् । परश्च परश्च परस्परम् ॥ ३ ॥

॥ इति द्वन्द्वः ॥

एकत्वे द्विगुद्वन्द्वौ ॥ १ ॥

एकत्वे वर्तमानौ द्विगुद्वन्द्वौ नपुंसकलिङ्गौ भवतः ॥ १ ॥

संख्यापूर्वो द्विगुः ॥ २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संख्यापूर्वः समासो द्विगुर्निगद्यते ॥ २ ॥

समाहारेऽतईप् द्विगुः ॥३॥

समाहारेऽर्थे द्विगुः समासो भवति । ततोऽकारान्ताद्दीप् प्रत्ययो भवति । दशानां ग्रामाणां समाहारो दशग्रामी । आकारान्तो द्विगुः स्त्रियां भाष्यते । पञ्चाग्नयः समाहृता इति पञ्चाग्नि । पञ्चानां गवां समाहारः पञ्चगु । नपुंसकत्वाद्ध्रस्वत्वम् । त्रिफलेति रूढिः ॥ ३ ॥

पात्रादीनामीप्प्रतिषेधो वक्तव्यः ॥ * ॥

॥ इति द्विगुः ॥

बहुव्रीहिरन्यार्थे ॥ १ ॥

अन्यपदार्थे प्रधानो यः समासः स बहुव्रीहिसंज्ञकः समासो भवति । बहु धनं यस्य स बहुधनः । अस्ति धनं यस्य सोऽस्तिधनः । यस्य प्रधानस्यैकदेशं विशेषणतया यत् प्रतिज्ञायते स तद्गुणसंविज्ञानो बहुव्रीहिः । लम्बौ कर्णौ यस्य स लम्बकर्णः ।

बहुव्रीहौ विशेषणसप्तम्यन्तयोः पूर्वनिपातो वक्तव्यः ॥ * ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कण्ठे कालो यस्यासौ कण्ठेकालः । करे धनं यस्य स करधनः ॥ १ ॥

नेन्द्वादिभ्यः ॥ २ ॥

सप्तम्यन्तस्य पूर्वनिपातो न भवति ॥ इन्दुशेखरः चक्रपाणिः । पद्मनाभः । कपिध्वजः ॥ २ ॥

प्रजामेधयोरसुक् ॥ ३ ॥

सुप्रजाः दुर्मेधाः अल्वसोः सौ ॥ ३ ॥

धर्मादन् ॥ ४ ॥

सुधर्मा ॥ ४ ॥

अन्यार्थे ॥ ५ ॥

स्त्रीलिङ्गस्यान्यार्थे वर्तमानस्य ह्रस्वो भवति पुंवद्वा । समासे सति समानाधिकरणे पूर्वस्य स्त्रीशब्दस्य पुंवद्भावो वा भवति । पुंवद्भावादापो निवृत्तिः । रूपवती भार्या यस्य स रूपवद्भार्यः । वाग्रहणात् कल्याणीप्रिय इत्यादौ न भवति ॥ ५ ॥

गोः ॥ ६ ॥

गोशब्दस्यान्यार्थे वर्तमानस्य ह्रस्वो भवति पञ्च गावो यस्य स पञ्चगुः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संख्यासुव्याघ्रादिपूर्वस्य पादशब्दस्यालोपो वक्तव्यः ॥ * ॥
सहस्रं पादा यस्य स सहस्रपात् । शोभनौ पादौ यस्य स सुपात् । व्याघ्रस्य पादाविव पादौ यस्य स व्याघ्रपात् । द्वौ पादौ यस्य स द्विपात् द्विपादौ द्विपादः द्विपादं द्विपादौ ।

शसादौ स्वरे परे पदादेशश्च वक्तव्यः ॥ * ॥
द्विपदः द्विपदा द्विपाद्भ्यां द्विपाद्भिः इत्यादि ॥६॥

टाडकाः ॥ ७ ॥

समासे सति ट अ ड क इत्येते प्रत्यया भवंति। टकारस्तत्पुरुषे च अकारो द्वन्द्व एव च ॥ डकारश्च बहुव्रीहौ ककारोऽनियमो मतः ॥ ७ ॥

नो वा ॥ ८ ॥

नान्तस्य पदस्य टेर्लोपो वा भवति यकारे स्वरे परे । बाधकत्वात् क्वचिन्न भवत्युपधालोपश्च । अन्हो मध्यं मध्यान्हः । कवीनां राजा कविराजः । टकारोऽनुबन्ध ईवर्थः । कविराजी । राज्ञा पूः राजपुरम् । वाक् च मनश्च वाङ्मनसम् । दक्षिणस्यां दिशि पन्थाः दक्षिणापथः । च-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हश्च रात्रिश्च अहोरात्रम् । द्वौ च त्रयश्च परिमाणं येषां ते द्वित्राः । पञ्च च षट् च परिमाणं येषां ते पञ्चषाः । बहवो राजानो यस्यां नगर्यां सा बहुराजा नगरी । अत्र टिलोपे कृते आपतः स्त्रियामित्याप् । बहवः कर्तारो यस्य स बहुकर्तृकः ॥ ८ ॥

कर्मधारयस्तुल्यार्थे ॥ ९ ॥

पदद्वये तुल्यार्थे एकार्थनिष्ठत्वे सति कर्मधारयः समासो भवति । नीलं च तदुत्पलं च नीलोत्पलम् । रक्ता चासौ लता च रक्तलता । पुमांश्चासौ कोकिलश्चेति पुंस्कोकिलः ॥ ९ ॥

पुंसः खपे ॥ १० ॥

संयोगान्तलोपो वक्तव्यः ॥ * ॥

नाम्नश्च कृता समासः ॥ ११ ॥

प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन समासस्तत्पुरुषो भवति । प्रकृष्टो वादः प्रवादः । कुम्भं करोतीति कुम्भकारः ॥ १० ॥ ११ ॥

ससादेः सादिः ॥ १२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समासे सति सहादीनां सादिर्भवति । पुचया सह वर्तत इति सपुचः । सहसंतिरसां सध्रिसमितिरयः । सह अञ्चतीति सध्र्युङ् । सम् अञ्चतीति सम्यङ् । तिरः अञ्चतीति तिर्यङ् ॥१२ ॥

को कदादिः ॥ १३ ॥

कुशब्दस्य कुत्सितेषदर्थयोस्तत्पुरुषे कत्कावका आदेशा भवंति । कुत्सितं अन्नं कदन्नम् । ईषदर्थे । ईषदुष्णा कवोष्णा काष्णाम् ॥ १३ ॥

कोर्मंदादेशश्च ॥ १४ ॥

मन्दोष्णम् ॥ १४ ॥

रथवदयोश्च ॥१५ ॥

कद्रथः कद्वदः ॥ १५ ॥

पुरुषे वा ॥ १६ ॥

कु पुरुषः कापुरुषः ॥ १६ ॥

पथ्यक्षयोः ॥ १७ ॥

कोः कादेशः स्यात् । कु पथः कापथः । कु अक्षः काक्षः ॥ १७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईषदर्थे च ॥ १८ ॥

ईषज्जलं काजलम् । षड्भिरधिका दश षोडश । षड् दन्ता यस्य षोडन् । षष् दन्त इति स्थिते । दन्तस्य दत्व । कट इत् । षस्य डत्वम् । दस्य डः । वतो नम् । षोडन् । षट् प्रकाराः षोढा । संख्यायाः प्रकारे धा ॥ धस्य ढः ।

षष लत्वं दत्वदशधासूत्तरपदादेः ष्टुत्वं च भवतीति वक्तव्यम् ॥ * ॥ ८१

बृहच्छब्दस्य सुडागमे तलोपं च १९

बृहता पतिः बृहस्पति ॥ १९ ॥

महच्छब्दस्यटेराकारः समानाधिकरणे ॥ २० ॥

महादेवः महेश्वरः । द्यौश्च भूमिश्च द्यावाभूमी । द्यौशब्दस्य द्यावादेशः । जायायाः जंभावो दंभावो निपात्यते । दंपती जंपती । क्वचिज्जायापती । आकृतिगणोऽयम् ॥ २० ॥

अलुक् क्वचित् ॥ २१ ॥

क्वचित्समासे कृदन्ते तद्धितेऽपि विभक्तेरलुगभव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति । कृच्छ्रान्मुक्तः । अप्सु योनिरस्येत्यप्सुयोनिः। उरसि लोम यस्यासौ उरसिलोमा । हृदि स्पृशतीति हृदिस्पृक् । कण्ठे कालो यस्यासौ कण्ठेकालः । वाचोयुक्तिः दिशोदण्डः पश्यतोहरः वनेचरः खेचरः ॥

समानाधिकरणे शाकपार्थिवादीनां मध्यमपदलोपो वक्तव्यः ॥ * ॥

शाकः प्रियः यस्य सः शाकप्रियश्चासौ पार्थिवश्च शाकपार्थिवः ॥ २१ ॥

आदेश्च द्वन्द्वे ॥ २२ ॥

द्वन्द्वे समासे पूर्वपदस्य लोपो भवति ॥ चकारग्रहणाद्विकल्पेन । माता च पिता च पितरौ । शिष्यमाणो लुप्यमानार्थाभिधायी । श्वश्रूश्च श्वशुरश्च श्वशुरौ । दुहिता च पुत्रश्च पुत्रौ॥२२॥

ऋतां द्वन्द्वे ॥ २३ ॥

द्वन्द्वे समासे पूर्वपदस्य ऋकारस्य वा आकारो भवति । माता च पिता च मातापितरौ॥२३॥

द्वन्द्वे सर्वादित्वं वा ॥ २४ ॥

द्वन्द्वे समासे सर्वादित्वं वा भवति ॥ वर्णाश्च आ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

असाश्च इतरे च वर्णास्तेमेतरे वर्णाश्रमेतराः।
वैयधिकरण्ये बहुव्रीहौ मध्यमपदलोपो वक्तव्यः ॥ * ॥
कुमुदस्य गन्ध इव गन्धो यस्य सः कुमुदगन्धिः ॥ २४ ॥

उपमानाच्च ॥ २५ ॥

उपमानात्परस्य गन्धशब्दस्याकारो भवति। हंसस्य गमनमिव गमनं यस्याः सा हंसगमना॥२५॥

दिक्संख्ये संज्ञायाम् ॥ २६ ॥

दिग्वाच्यसंख्यावाचकशब्दौ संज्ञायां विषये परपदतुल्यार्थे समस्येते। स समासस्तत्पुरुषो भवति॥ स्वपदविग्रहो नित्यसमासः। अन्यस्त्वस्वपदविग्रहोऽपि ॥ दक्षिणाग्निः सप्तग्रामः ॥२६॥

इति समासप्रक्रिया ॥

॥ अथ ताद्धिता निरूप्यन्ते ॥

अपत्येऽण् ॥ १ ॥

नाम्नोऽपत्येऽर्थे अण् प्रत्ययो भवति ॥ उपगोरपत्यमिति वाक्ये उपगोः अण् इति स्थिते समास-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रत्यययोरिति षष्ठीलोपः । णकारो वृद्ध्यर्थः ॥१॥

आदिस्वरस्य ञ्णिति च वृद्धिः ।२॥

स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्भवति ञ्णिति तद्धिते परतः ।उकारस्य औकारो वृद्धिः॥२॥

वोऽव्यस्वरे ॥ ३ ॥

उकारस्योकारस्य च अव् भवति यकारे स्वरे औपगवः वासिष्ठः गौतमः ।

शिवादिभ्यश्चेति वक्तव्यः ॥ * ॥

शैवः वैदेहः ॥ ३ ॥

ऋ उरणि ॥ ४ ॥

ऋकारस्य उर् भवति अणि परे ॥ ४ ॥

षषो णो मातरि ॥ ५ ॥

षाण्मातुरः द्वयोर्मात्रोरपत्यं द्वैमातुरः ॥ ५ ॥

अत इञनृषेः ॥ ६ ॥

अकारान्तात् नाम्नाऽनृषिशब्दादपत्येऽर्थे इञ् प्रत्ययो भवति । अस्य लोपः । देवदत्तस्यापत्यं देवदत्तिः । श्रीधरस्यापत्यं श्रैधरिः । दशरथस्यापत्यं दाशरथिः । पुरन्दरस्यापत्यं पौरन्दरिः ॥६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बह्वादिभ्यश्च ॥ ७ ॥

औपगवि: कार्ष्णि: औडुलोमि: आग्निशर्मि॥७॥

यायनण्णेयण्णिया गर्गनडात्रिस्त्रीपितृष्वस्त्रादेश्च ॥ ८ ॥

गर्गादेर्नडादेरत्र्यादे: स्त्रीलिङ्गात् पितृष्वस्रादेश्च य आयन् ण् एयण् णीय इत्येते प्रत्यया भवन्ति अपत्येऽर्थे । गर्गस्यापत्यं गार्ग्य: । वत्सस्यापत्यं वात्स्य: । नडस्यापत्यं नाडायन: । चरस्यापत्यं चारायण: । अत्रेरपत्यं आत्रेय: । गाङ्गेय: । मह्या अपत्यं माहेय: । कपेरपत्यं कापेय: । पैतृष्वस्रीय: ॥ ८ ॥

अलुक् क्वचित् ॥ ९ ॥

अमुष्य अपत्यं आमुष्यायण: ।

मातृपितृभ्यां स्वसु: सस्य षत्वं वक्तव्यम् । * ।

मातृष्वस्रीय: ॥ ९ ॥

पातृमातृभ्यां व्यडुलौ ॥ १०

पितुर्भ्राता पितृव्य: मातुर्भ्राता मातुल: ॥ १० ॥

पितुर्डामहन् ॥ ११ ॥

पितु: पिता पितामह:।पितुर्माता पितामही ॥११

लुग्बहुत्वे क्वचित् ॥ १२ ॥

अपत्येऽर्थे उत्पन्नस्य प्रत्ययस्य बहुत्वे सति क्वचि-दृष्यन्तर्षिविषये लुग् भवति । गर्गाः वसिष्ठाः अ-त्रयः विदेहाः ॥ १२ ॥

देवतेदमर्थे ॥ १३ ॥

देवतार्थे इदमर्थे चोक्ताः प्रत्यया भवन्ति । इन्द्रो देवता अस्येत्यैन्द्रं हविः । सोमो देवता अस्येति सौम्यम् । देवदत्तस्येदं दैवदत्तं वस्त्रम् ॥ १३ ॥

क्वचिद्द्वयोः ॥ १४ ॥

पूर्वपदोत्तरपदाद्योः क्वचिद्वृद्धिर्भवति । अग्निमरु-तौ देवतेऽस्येत्याग्निमारुतं कर्म । सुहृदो भावः सौहार्दम् ॥ १४ ॥

अत्र भावे अणवक्तव्यः ॥ * ॥

णितो वा ॥ १५ ॥

उक्ताः प्रत्यया विषयान्तरे णितो वा भवन्ति । अजो गौर्यस्य सः अजगुस्तस्येदं धनुः आजगवं वा जगवं वा कुमुदस्य गन्ध इव गन्धो यस्य सः कुमु-दगन्धिः तस्यापत्यं स्त्री कौमुदगन्ध्या । । श्वशुर-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यायं स्त्रुघ्नपुर्यो ग्रामः। विष्णोरिदं वैष्णवम्। गोरिदं गव्यम्। कुलस्येदं कुल्यम्॥ १५॥

य्वन्मदेकत्वे॥ १६॥

तव इदं त्वदीयम्। मम इदं मदीयम्॥ १६॥

चतुरश्चलोपः॥ १७॥

चतुर्शब्दस्य चकारस्य लोपो भवति यच्छियोः परतः। तुर्यः तुरीयः॥ १७॥

अन्यस्य दुक्॥ १८॥

अन्यशब्दस्य दुगागमो भवति णीयप्रत्यये परे। अन्यस्य अन्यदीयम्। अर्धजरत्या इदं अर्धजरतीयम्॥ १८॥

कारकात् क्रियायुक्ते॥ १९॥

कारकादयेते प्रत्यया भवन्ति क्रियायुक्ते कर्तरि कर्मणि चाभिधेये। कुंकुमेन रक्तं वस्त्रं कौंकुमम्। मथुराया आगतो माथुरः। ग्रामे भवः ग्राम्यः। धुरं वहतीति धुर्यः-धौरेयः॥ १९॥

केनेयेकाः॥ २०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कईनञ्यञ्कञ्त्र्य ते प्रत्यया भवन्ति भवाद्यर्थेषु । णित्वं चैषां वैकल्पिकम् । कर्णाटे भवः कार्णाटकः कर्णाटको वा । ग्रामादागतस्तत्र जातो वा ग्रामीणः ग्राम्यः । सध्रीचि भवः सध्रीचीनः । समीचि वभः समीचीन । तिरश्चि भवः तरश्चीनः ॥ २० ॥

यलोपं च ॥ २१ ॥

क्वचिद्यकारलोपो भवति । कन्यायाः जातः कानीनः ॥

नक्षत्राद्णवक्तव्यः ॥ * ॥

पुष्येण युक्ता पौर्णमासी पौषी । पौष्यां भवः पौषीणः ॥ २१ ॥

इयो वा ॥ २२ ॥

क्षतात् त्रयत इति क्षत्रम् । क्षत्रे भवः क्षत्रियः क्षात्रः । शुक्राज्जातं शुक्रियम् । इन्द्राज्जातं इन्द्रियम् । अक्षैर्दीव्यतीति आक्षिकः । शब्दं करोतीति शाब्दिकः । तर्कं करोतीति तार्किकः । वेदे जातावैदिकी स्तुतिः ऋग्वा ॥ २२ ॥

किमादेस्त्यतनौ ॥ २३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किमादेरद्यादेर्भवाद्यर्थेषु त्यतनौ प्रत्ययौ भवतः। कुत्र भवः । कुत्रत्यः कुतस्त्यः । अद्य भवः अद्यतनः । ह्यो भवः ह्यस्तनः । श्वो भवः श्वस्तनः । सदा भवः सदातनः ।

दक्षिणापश्चात्पुरसस्त्यण् वक्तव्यः ॥ * ॥

दाक्षिणात्यः । पाश्चात्त्यः । पौरस्त्यः ॥ २३ ॥

स्वार्थेऽपि ॥ २४ ॥

उक्ताः प्रत्ययाः स्वार्थेऽपि भवन्ति । देवदत्त एव दैवदत्तकः । चत्वार एव वर्णाः चातुर्वर्ण्यम् । चोर एव चौरः ॥ २४ ॥

भागरूपनामभ्यो धेयः स्वार्थेऽपि॥२५

अणीनयोर्युष्मदस्मदोस्तवकादय आदेशा भवन्ति। तव इदं तावकम् । मम इदं मामकम् । तावकीनः । मामकीनः । यौष्माकः । आस्माकः । यौष्माकीणः । आस्माकीणः । ॥ २५ ॥

वत्तुल्ये ॥ २६ ॥

तुल्ये सदृश्येऽर्थे वत्प्रत्ययो भवति । चन्द्रेण तुल्यं चन्द्रवत् मुखम् । घटेन तुल्यं घटवत् उदरम् । पटवत् कम्बलम् ॥ २६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावे त्वतयण: ॥ २७ ॥

शब्दस्य प्रवृत्तिनिमित्तं भावस्तस्मिन् भावे त त्व यण् इत्येते प्रत्यया भवन्ति । ब्राह्मणस्य भावो ब्राह्मणता । त्वयणौ नपुंसकलिङ्गौ भवतः । ब्राह्मणत्वं ब्राह्मण्यम् सुमनसो भावः सौमनस्यम् । सुभगस्य भावः सौभाग्यम् विदुषो भावः वैदुष्यम् ॥ २७ ॥

समाहारे ता च गुणः ॥ २८ ॥

चयाणां समाहारः चेता जनानां समूहो जनता । देवता ।

कर्मण्यपि यण् वक्तव्यः ॥ * ॥

ब्राह्मणस्य कर्म ब्राह्मण्यम् । राज्ञः इदं कर्म राजन्यम् ॥ २८ ॥

लोहितादेरिमन् ॥ २९ ॥

लोहितादेर्भावेऽर्थे इमन् प्रत्ययो भवति स च डित् । डित्त्वाट्टिलोपः । लोहितिमा । अणोर्भावः अणिमा । लघोर्भावो लघिमा । महतो भावो महिमा ॥ २९ ॥

ऋदु र इमनि ॥ ३० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋकारस्य रेफो भवति इमनि परे । प्रथिमा । द्रढिमा । बहोर्भाव इति विग्रहे ॥ ३० ॥

बहोर्लोपो भूश्च बहोः ॥ ३१ ॥

बहोरुत्तरेषामिमनादीनामिकारस्य लोपो भवति। बहोः स्थानेभू स्यादेशः। बहोर्भावो भूमा ३१ ।

अस्त्यर्थे मतु : ॥ ३२ ॥

नाम्नो मतुप्रत्ययो भवति अस्यास्मिन्नस्तीत्येतस्मिन्नर्थे । उकारो नुम्विधानार्थः । त्रितो नुम् । गोमान् । श्रीमान् । गोमती । श्रीमती आयुष्मान् ॥ ३२ ।

अइकौ मत्वर्थे ॥ ३३ ॥

मत्वर्थे अइकौ प्रत्ययौ भवतः । वैजयन्ती पताका अस्य अस्मिन् वा वैजयन्तः प्रासाद । माया विद्यते अस्यास्मिन्वा मायिकः ॥ ३३ ॥

मान्तो पधाद्वत्वि नौ ॥ ३४ ॥

मकारान्तान्मकारोपधाद्वकारोपधाच्च वत्विनौ प्रत्ययौ भवतः भवतः अस्त्यर्थे । किंवान्। लक्ष्मीन् । भगवान् । धनी । दण्डी । छत्री । दृषद्वती भूमिः । शमी । कामी ॥ ३४ ॥

तडिदादिभ्यश्च॥ ३५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तडित्वान् । विद्युत्वान् । मरुत्वान् ॥ ३५ ॥

एतद्किंयत्तद्भ्यः परिमाणे वतुः ३६

यत्तदोरा ॥ ३७ ॥

यत्तदोष्टेरात्वं भवति वतौ परे ॥ ३६ ॥ ३७ ॥

किमः कियश्च ॥ ३८ ॥

किम्शब्दस्य कियादेशो भवति वतौ परे । चकारान्मस्य वकारस्य यकारो भवति। कि- यान् ॥ ३८ ॥

आ इश्चैतदो वा ॥ ३९ ॥

वतुप्रत्यये परे एतत्शब्दस्य आ इश् इत्येतावादेशौ भवतः । गुरुः शिच्चेति शित्त्वात्कृत्स्नस्य आ- इति गुरुस्तथापि चकारदान्तस्यैव टेरकारादेशो भवति न कृत्स्नस्य । यस्मिन् पक्षे आदेशादेशस्तस्मिन् पक्षे प्रत्ययस्य वकारस्य यकारादेशो भवति । एतावान् । इयान् ॥ ३९ ॥

तुन्दादेरिलः ॥ ४० ॥

तुन्दादेरिलः प्रत्ययो भवति अस्त्यर्थे । तुन्दमस्या स्तादि तुन्दिलः ॥ ४०

औन्नत्येत दन्दादुरः ॥ ४१ ॥

उन्नता दन्ता यस्य सः दन्तुरः ॥ ४१ ॥

श्रद्धादेर्लुः ॥ ४२ ॥

श्रद्धादेर्गणाल्लुप्रत्ययो भवति । श्रद्धास्यास्तीति श्रद्धालुः । दयालुः । कृपालुः ॥

अस्मायामेधास्रग्भ्योऽस्त्यर्थे विन्वक्तव्यः ॥ *॥

तपोऽस्यास्तीति तपस्वी । मायावी । मेधावी । स्रग्वी ॥ ४२ ॥

वाचो ग्मिनिः ॥ ४३ ॥

वाग्मी ॥ ४३ ॥

आलाटौ कुत्सितभाषिणि ॥ ४४ ॥

वाचालः वाचाटः ॥ ४४ ॥

ईषत्समाप्तौ कल्पदेश्यदेशीयाः ॥ ४५ ॥

ईषत् परिसमाप्तः सर्वज्ञः सर्वज्ञकल्पः । पटुदेश्यः । कविदेशीयः ॥ ४५ ॥

प्रशंसायां रूप्यःप्रशस्ते ॥ ४६ ॥

प्रशस्तो वैयाकरणो वैयाकरणरूप्यः ॥ ४६ ॥

भूतपूर्वे चरट् ॥ ४७ ॥

दृष्टचरः । दृष्टचरी ॥ ४७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राचुर्यविकारप्राधान्यादिषु मयट् ॥ ४८ ॥

अन्नं प्रचुरं यस्मिन् सः अन्नमयो यज्ञः । मृन्मयो घटः । क्षौमयो जालमः । अमृतमयश्चन्द्रः । तदधीते वेत्यत्राणवक्तव्यः व्याकरणमधीते वेद वा वैयाकरणः । शोभनोऽश्वः तं वेदेति सौवश्वः॥४८॥

न सन्धिय्वोर्युट् च सन्धिजौ य्वौ ॥ ४९ ॥

सन्धिजौ य्वौ तयोः सन्धिजयोर्यकारवकारयोः सम्बन्धिनः स्वरस्य वृद्धिर्न भवति किन्तु तयोर्युडागमो भवति । इट् उट् इत्येतावागमौ भवतः । वर्णविश्लेषं कृत्वा यकारात्पूर्वमिकारः । वकारात्पूर्वमुकारः । स्वरहीनं परेण संयोज्यम् । आदिस्वरस्य ञ्णिति च वृद्धिः । वैयाकरणः सौवश्वः ॥ ५८ ॥

इतो जातार्थे ॥ ५० ॥

लज्जितः । पण्डितः । तृषितः ॥ ५० ॥

तरतमेयस्विष्ठाः प्रकर्षे ॥ ५१ ॥

अतिशयेऽर्थे तर तम ईयसु इष्ठ इत्येते प्रत्यया भवन्ति । अतिशयेन कृष्णः कृष्णतरः । अतिश-

येन शुक्तः शुक्ततमः ॥

ईयस्विष्ठौ ङितावीति वक्तव्यौ ॥ * ॥

उकारो नुम्विधानार्थः । न सम्महत इति दीर्घः । अतिशयेन लघुः लघीयान् । अतिशयेन पापः पापिष्ठः । पापीयान् । पापीयसी । लघिष्ठः । लघीयसी ॥ ५१ ॥

गुर्वादेरिष्ठेमनीयस्सु गरादिष्टिलोपश्च ॥ ५२ ॥

गुरु प्रिय स्थिर स्फिर उरु बहुल वृद्ध दीर्घ प्रशस्य बाढ़ युवन् अल्प स्थूल दूर अन्तिक एषां क्रमेण गर प्र स्थ स्फ वर वंहि ज्या द्राघ श्र साध यव कन स्थव दव नेद एते आदेशा भवन्ति । अतिशयेन गुरुः गरीयान् । गरिष्ठः । गुरोर्भावो गरिमा । अतिशयेन प्रियः प्रेयान् प्रेष्ठः प्रेमा । अतिशयेन स्थिरः स्थेयान् स्थेष्ठः । अतिशयेन उरुः वरीयान् वरिष्ठः । अतिशयेन स्फिरः स्फेयान् । अतिशयेन बहुलः वंहीयान् अतिशयेन वृद्धः । इलोपी ज्याशब्दादीयसः । वृद्धस्य ज्यायान् ज्येष्ठः । अतिशयेन दीर्घः द्राघीयान् द्राघिष्ठः द्राघीयसी द्राघिमा । प्रशस्यस्य आदेशः इष्ठस्ये-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारस्य यि भवति । अतिशयेन बहुः भूयिष्ठः । ईयस ईलोपः । भूयान् । भूयसी । दूरस्य दवादेशः । दविष्ठः दवीयान् दवीयसी । क्षिप्रशब्दस्य क्षेपादेशः । क्षेपिष्ठ क्षेपीयान् क्षुद्रशब्दस्य क्षोदादेशः । क्षोदीयान् ॥ ५२ ॥

बहो रिष्ठेर्यिः ॥ ५३ ॥

बहोरुत्तरस्येष्ठप्रत्ययस्येकारस्य यिर्भवति । बहोः स्थाने भूयादेशः । भूमा ।

किमोऽव्ययादाख्याताच्च तरतमयोराम्वक्तव्यः॥ * ॥

कुतस्तरां परमाणवः । कुतस्तेषामारम्भकत्वम् । उच्चैस्तरां गायति । पठतितमाम् । पचतितमाम् ॥ ५३ ॥

अव्ययसर्वनाम्नामक-च् प्राक् टेः ॥ ५४ ॥

उच्चकैः । यकः । सकः । सर्वकः ॥ ५४ ॥

परिमाणे दघ्नादयः ॥ ५५ ॥

परिमाणेऽर्थे दघ्नट् द्वयसट् मात्रट् इत्येते प्रत्यया भवन्ति । जानुदघ्नं जलम् । शिरोद्वयसम् । पुरुषमात्रम् ॥

द्वयोर्बहूनां चैकस्य निर्धारणे किमादिभ्यो डतरडतमौ वक्तव्यौ ॥ * ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कतरो भवतां काणवः। कतमो भवतां तान्त्रिकः। भवतोर्यतरस्तार्किकस्ततर उद्गच्छतात्॥५५॥

संख्येयविशेषावधारणे

द्वित्रिभ्यां तीयः॥ ५६॥

द्वयोः संख्यापूरकः द्वितीयः। त्रयाणां संख्यापूरकः तृतीयः। त्रेः संप्रसारणम्॥ ५६॥

षट् चतुरोः स्थट्॥ ५७॥

षष्ठः। चतुर्थः॥ ५७॥

पञ्चादेर्मट्॥ ५८॥

पञ्चमः। सप्तमः। अष्टमः। नवमः॥ ५८॥

विंशत्यादेर्वा तमट्॥ ५९॥

विंशतितमः। विंशतिः॥ ५९॥

विंशतेस्तिलोपो डिति॥ ६०

विंशः। विंशत्तमः॥ ६०॥

शतादेर्नित्यम्॥ ६१॥

शततमः॥ ६१॥

एकादशादेर्डज् ६२॥

एकादशः। द्व्यष्टानां द्वात्रयोऽष्टाः। द्वादशः। त्रयोदशः। अष्टादशः॥ ६२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कतिकतिपयाभ्यां थः ॥ ६३ ॥

कतिथः । कतिपयथः ॥ ६३ ॥

संख्यायाःप्रकारे धा ॥ ६४ ॥

द्विप्रकारं द्विधा । चतुर्धा । गुणो अण् च । द्वैधा त्रैधा । णित्त्वाद्वृद्धिः । यस्य लोपः ॥ ६४ ॥

अतोऽम् ॥ ६५ ॥

द्वैधम् । त्रैधम् ॥ ६५ ॥

क्रियाया आवृत्तौ कृत्वम् ॥ ६६ ॥

पञ्चकृत्वः । सप्तकृत्वः ॥ ६६ ॥

द्वित्रिभ्यां सुः ॥ ६७ ॥

द्विः । त्रिरुक्तम् ॥ ६७ ॥

बह्वादेः शस् ॥ ६८ ॥

बहुशः । शतशः ॥ ६८ ॥

तयाटौ संख्यायाम् ॥६९ ॥

द्वितयम् । त्रितयम् । द्वयम् । त्रयम् ॥ ६९ ॥

शेषा निपाताः कत्यादयः ॥ ७० ॥

का संख्या येषां ते कति ॥ ७० ॥

॥ इति तद्धितप्रक्रिया समाप्ता ॥

इति सारस्वते पूर्वार्धं

संपूर्णम् ॥

-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGang

umukshu Bhawan Varanasi Collection. Digitized by e

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGango